Considering the above facts the Government of Kerala ordered the reprinting of this book along with some other 'out of print' books such as 'Rasavaiseshika', 'Ayurveda Medical Dictionary', and 'Yogamrtham'.

In this edition retaining all the materials of the first edition, an additional introduction in English elucidating the peculiarities of Tantrayukti is included. This will help those readers who are not well-versed in sanskrit to get a clear idea of Tantrayuktis and their usefulness in learning Ayurveda. Further all the textual matters on Tantrayukti that appear scattered in different source books are collected and presented in an appendix which contain original text materials from Charaka, Susruta, Astanga-Sangraha, Sarvangasundari, and Kautalya Arthasastra. This will

---

*** Separate editions with either of these are available**

prove to be a very good tool of reference. This book and the forthcoming publications will appear under a series, viz. The Kerala Government Ayurveda Publication Series.

It now remains for me to thank all those who have evinced very keen interest in this project and contributed in various ways. I express my gratitude to Shri N. K. Balakrishnan, Honourable Minister for Health, Government of Kerala, who pioneered a Publication Division, which is the first of its kind in India and to Shri. C. P. Ramakrishna Pillai I. A. S., Secretary for Health, Government of Kerala, who, with benevolence and enthusiasm has removed the teething troubles of this project and steered it towards progress.

Dr. N. Sridharan, Director of Indigenous Medicine, was the designer of this project when he was the Principal of the Ayurveda College, Trivandrum. From the very inception of the Publication Division he has spared ungrudgingly his precious time to discuss problems and find out solutions. He has also assented in the most generous way to the requests made to him in this regard. But for his farsightedness and scholarly guidance this work could not have been published. To him the students owe felicitations while teachers no less than the students will value his initiative and enthusiasm in publishing rare and unavailable books on Ayurveda. I am indebted to him.

My heartfelt thanks are due to Dr. M. P. Sridharan Nair, Principal, Government Ayurveda College, Trivandrum, who is the controlling officer of this project. Actually he is the architect of the Publication Division and it is during his tenure that the Publication Division was organised. Usually administrators hardly find time for or show interest in academic matters. But quite contrary to this Dr. M. P. Sridharan Nair is very keen on supervising and guiding the activities of the Publication Division. It is hoped that many more books will be published under his able guidance. I am obliged to Dr. K. R. Srikantamoorthi and Dr. K. Raghavan Tirumulpad who took trouble of preparing the expositions of 'Tantra yukti' in English and Malayalam respectively.

I take this opportunity to express my obligation to the member of the Advisory Committee for the Publication Division,

Dr. M.S. Sankara Narayanan, Deputy Director of Indigenous Medicine, Dr. R. Sankaran Nair, Reader, Post Graduate Study Centre, Administrative officer, Government Ayurveda College, for the help and guidance I have received from them.

Last but not least, my thanks are due to Dr. S. Venkita Subrahmonya Iyer, Professor and Head of the Department of Sanskrit and Dean, Faculty of Oriental Studies, University of Kerala, Who has brushed up the style of English in this introduction.

I will be failing in my duty if the appreciation due to Sri. N. Divakaran, Artist, Government Ayurveda College, who prepared a beautiful design for the cover, and to M/s. St. Joseph's Press and M/s 'Ajit Printers who brought out this beautiful book, remains unrecorded.

The great enthusiastic and encouraging interest which the concerned authorities and others are showing in this vast and laborious undertaking emboldens me to venture on further undertakings and projects which I hope, will very probably turn out to be a landmark in the history of Ayurveda in Kerala.

1-7-1976
Publication Division,
Government Ayurveda College,
Trivandrum.

N. E. Muthuswami
editor

॥ श्रीः ॥

अवतारिका ।

पुरा खलु केरळेषु, काव्यनाटकालङ्कारेष्विव तर्कव्याकरणादिशास्त्रेष्वपि निष्णाता बहवः कवय आसन् । तेषां ललितसुकुमाराणां पद्यानां प्रणयनविषये यावद्वासनाजन्यं पाटवमासीत् कर्कशतर्कजटिलेषु शास्त्रेष्वपि तावद् वाग्वैभवसहकृतं पाण्डित्यमवर्ततेत्ययं विषयस्सर्वविदित एव । सरससरसैस्सुललितैश्च पद्यैरलङ्कृतासु तेषां कृतिषु लक्ष्मीदासस्य "शुकसन्देशः" वासुदेवस्य "युधिष्ठिरविजयः", शक्तिभद्रस्या"श्चर्यचूडामणिः", शङ्करकवेः "श्रीकृष्णविजयः", नारायणस्य "सुभद्राहरणं" (महाकाव्यं), कोटिलिङ्गपुरयुवराजस्य "रामचरितं", नारायणभट्टस्य "नारायणीय" मित्येवमादयो नितरां प्राधान्यमर्हन्ति ।

किञ्च कविहृदयज्ञाने काव्यामृतरसास्वादने च तेषामासीदनन्यसुलभं प्रागल्भ्यमित्यत्र मेघसन्देशमालतीमाधवोत्तररामचरितमाघरघुवंशानर्घराघवादीनां प्राचीनानां विशिष्टकृतीनां तत्कृतानि व्याख्यानान्येवोत्तमसाक्ष्यं वहन्ति । मानमेयोदयप्रक्रियासर्वस्वप्रपञ्चसारादयस्तेषां शास्त्रग्रन्था औत्तराहाणामपि पण्डितवर्याणां प्रशंसापात्रमभूवन्निति इदं केरळीयानामस्माकमतीव चारितार्थ्यं जनयति । अद्वैतमतस्थापकस्सर्वज्ञस्सर्वलोकविदितमहिमा पूज्यभगवत्पादो जगद्गुरुः श्रीमान् शङ्कराचार्योऽपि इमं देशमवतारेणालमकार्षीदितीदं तत्त्वं विजानतां केषां वा पण्डितानां भवेत् केरळदेशस्यास्य प्राधान्ये विवादः ?

विशिष्य च ज्योतिश्शास्त्रेषु तेषां सर्वातिशायि पाण्डित्यमासीत् । अत्र च तैःप्रणीता भास्करीय-दृग्गणिततन्त्र-तन्त्रसङ्ग्रहादयस्स्वतन्त्रग्रन्थाः, भास्करीय–नीलकण्ठीय-सूर्यदेवीयादय आर्यभटीयभाष्यग्रन्थाश्च दृष्टास्तां

वहन्ति । किञ्च करणपद्धति-स्फुटनिर्णय-करणोत्तमादयोऽप्युत्तमा गणितग्रन्था इदानीमपि प्राकाश्यपदवीमलभमानास्तत्रतत्र ग्रन्थशालासु लीनाः केवलं वल्म्यादीनामेवास्वादनयोग्या वर्तन्ते ।

वैद्यशास्त्रेषु चिकित्सायां च केरळीयानां वैदग्ध्यं बहोः कालात् प्रागेव विदेशीयैरपि ज्ञातं प्रत्यक्षतोऽनुभूतं च । अत्रत्यानामष्टवैद्यानामन्येषां च तत्सदृशानां वैद्यवर्याणां अनन्यसाधारणीं चिकित्सानैपुणीं श्रुत्वा विदेशीया बहवो राजानः प्रभवश्च चिकित्सार्थमत्रागत्य चिकित्सया दुरुपशमेभ्योऽपि महारोगेभ्यो विनिर्मुक्ताः स्वस्थात्मानः प्रतिनिवर्तन्त इति च सर्वैरपि सुतरां विज्ञातमेव ।

अतिप्रसिद्धस्य वाहटकृताष्टाङ्गहृदयस्य केरळीयवैद्यपण्डितैः कृताः पाठ्यबृहत्पाठ्यहृदयबोधकाद्या विपुला व्याख्याः, केरळीयानां वैद्यशास्त्र पाण्डित्यं सुस्पष्टं प्रदर्शयन्ति । अन्ये च सन्ति योगरत्नसमुच्चयहृदयप्रियसुखसाधकादयो बहवो ग्रन्था अद्य यावदपि प्राकाश्यमलभमानाः ।

तथाभूतेष्वन्तर्लीनेषूत्तमेषु ग्रन्थेषु नरसिंहाचार्यकृतभाष्योपेतो भदन्तनागार्जुनाचार्यविरचितो 'रसवैशेषिकसूत्रं' नाम कश्चिद् ग्रन्थः पूर्वमेव मया प्राकाशि । तदनन्तरं च द्वितीयतो वैद्यनाथ इत्यपरनामधेयेन नीलमेघभिषजा विरचितस्तन्त्रयुक्तिविचारो नामायं ग्रन्थः सम्प्रति सज्जनसमक्षं मया प्रकाश्यते ।

चरकाचार्यमते तन्त्रयुक्तयः पञ्चत्रिंशदित्यधो लिख्यमानेभ्यः पद्येभ्यो ज्ञायन्ते । ताश्च यथा—

"पञ्चत्रिंशद्विचित्राभिर्भूषितं तन्त्रयुक्तिभिः ।
तन्त्राधिकरणं योगो हेत्वर्थोऽर्थः पदस्य च ॥

प्रदेशोद्देशनिर्देशवाक्यशेषाः प्रयोजनम् ।
उपदेशापदेशातिदेशार्थापत्तिनिर्णयाः ॥

प्रसङ्गैकान्तनैकान्ताः सापवर्गो विपर्ययः ।
पूर्वपक्षविधानानुमतव्याख्यानसंशयाः ॥

अतीतानागतापेक्षास्वसंज्ञोह्यसमुच्चयाः ।
निदर्शनं निर्वचनं संनियोगो विकल्पनम् ॥
प्रत्युत्सारस्तथोद्धारः सम्भवस्तन्त्रयुक्तयः ।
तन्त्र व्याससमासाभ्यां भवन्त्येतानि कृत्स्नशः ॥"

सुश्रुताचार्यस्तु तन्त्रयुक्तयो द्वात्रिंशदित्यभिप्रैति । यथा—

"द्वात्रिंशत्तन्त्रयुक्तयो भवन्ति शास्त्रे । तद्यथा—अधिकरणं योगः पदार्थो हेत्वर्थ उद्देशो निर्देश उपदेशोऽपदेशः प्रदेशोऽतिदेशोऽपवर्जो वाक्यशेषोऽर्थापत्तिर्विपर्ययः प्रसङ्ग एकान्तोऽनेकान्तः पूर्वपक्षो निर्णयोऽनुमतं विधानमनागतावेक्षणमतिक्रान्तावेक्षणं संशयो व्याख्यानं स्वसंज्ञा निर्वचनं निदर्शनं नियोगो विकल्पः समुच्चय उह्यमिति ।"

चरकोक्तास्वेव पञ्चत्रिंशत्तन्त्रयुक्तिषु "पूर्वपक्षविधान" मित्येकं विभागं पूर्वपक्षः, विधानमिति विभागद्वयतया परिकल्य षट्त्रिंशत्तन्त्रयुक्तय इति सङ्ग्रहकारो वाहटाचार्यः प्रतिपादयति ।

तन्त्रयुक्तयष्षट्त्रिंशदितीदं वाहटमतमेव प्रस्तुतग्रन्थकर्तुर्नीलमेघभिषजोऽभिमतम् ।

सुश्रुताङ्गीकृतासु द्वात्रिंशत्तन्त्रयुक्तिषु प्रयोजनप्रत्युत्सारोद्धारसम्भवाख्याश्चतस्रो युक्तीरधिकतया योजयित्वा षट्त्रिंशत्तन्त्रयुक्तीः सङ्ग्रहकारोऽङ्गीकरोति ।

ग्रन्थकारो नीलमेघभिषक् तु तासु तन्त्रयुक्तिष्वेकैकामपि युक्तिं आनुष्टुभार्धपद्यमयैस्सूत्रैर्लक्षयित्वा तत्र तत्र शास्त्रोक्तानि वाक्यानि प्रमाणीकृत्य च सिद्धान्ततत्त्वं सुस्पष्टमवबोधयति ।

ग्रन्थकर्ता ।

अस्य च ग्रन्थस्य कर्ता नीलमेघभिषगिति,

"वैद्यनाथ इति कल्पितनाम्ना
नीलमेघभिषजा क्रियतेऽद्य ।"

इत्यस्मात् पद्यादवगम्यते । तत्सद्युक्तिलक्षणं समस्यं संक्षिप्य वदतोऽस्य

ग्रन्थकर्तुः शास्त्रो असामान्यं पाण्डित्यं "वैद्यनाथ इति कल्पितनाम्ना" इत्यंशेन प्रायोगिकचिकित्सायामनितरसाधारणं सर्वजनश्लाघनीयं वैदग्ध्यमप्यासीदित्यनुमातुं शक्यते ।

"लक्ष्यलक्षणमनुक्रममासां
लक्षितं स्वगुरुसुन्दरदृष्टया ।"

इत्यंशेन सुन्दरनामधेयः कश्चिदाचार्योऽस्य गुरुरिति च ज्ञायते ।

सुन्दराख्योऽयं प्रसिद्धस्य लक्षणामृतनाम्नो विषवैद्यग्रन्थस्य कर्ता सुन्दरभट्टाचार्यः स्यादिति प्रतिभाति ।

लक्षणामृतस्य केरळेष्वेव प्रसिद्धत्वात् तद्ग्रन्थे केरळदेशैकप्रसिद्धकटपयादिसङ्ख्यानिर्देशदर्शनाच्चार्यसुन्दरभट्टाचार्यः केरळीय एवेत्यभ्यूहितुं शक्यते ।

केरळीयस्य सुन्दरभट्टाचार्यस्यान्तेवासित्वादस्य च नीलमेघाचार्यस्य केरलीयाभिजनत्वं युक्तमेव । केरळेष्वतिप्रशस्तत्वेन प्रथितमष्टाङ्गसङ्ग्रहं प्रमाणीकृत्य स्वग्रन्थरचनया, चरकादीनां प्राचीनाचार्याणां मध्ये समर्पितबहुमानं वाहटाचार्यानुस्मरणेन केरळैकप्रसिद्धस्येन्दुव्याख्यानस्य तत्र तत्र प्रमाणतयोद्धरणेन चास्य पूर्वोक्तं केरळीयाभिजनत्वं दृढीकृतं भवति ।

"आत्तबुद्धिरवलोकितेश्वरात्" इति बुद्धमतपक्षपातिनि रामगुप्ते वाहटाचार्येऽपि

"आर्यावलोकितगुरुं पुनरार्यतारां" इति बुद्धमतानुयायिषु च सविशेषं बहुमानवतोऽप्यस्य

"शङ्करात्मानमिन्दुशेखरमाश्रये" इत्यनेनांशेन हिन्दुमतप्रसिद्धेश्वरस्मरणात्,

चूडाचन्द्रविनिष्यन्दि
सुधयाभूत् प्रसाधनम् ।
गरः कण्ठे परं यस्य
स पायाद् भुवनं भवः ।।"

इत्यनेन शिवस्तुतिरूपेण लक्षणामृतपद्येन तत्कर्तुः स्वगुरोः सुन्दराचार्यस्य वैदिकमतावलम्बिनः शिष्यत्वाच्च नीलमेघभिषजो वैदिकमतानुयायित्वं व्यक्तीभवति ।

वाहटाचार्यं सभक्तिबहुमानं नित्यं पुरातनकालात् प्रभृति ध्यायद्भिः केरळीयभिषग्भिरुपयुज्यमानः

"लम्बश्मश्रुकलापमम्बुजनिभ-
च्छायाद्युतिं वैद्यकान्
अन्तेवासिन इन्दुजज्जटमुखा-
नध्यापयन्तं सदा ।
आगुल्फामलकञ्चुकाञ्चितदरा-
लक्ष्योपवीतोज्ज्वलं
कण्ठस्थागुरुसारमञ्जितहृशं
ध्यायेद् दृढं वाहटम् ॥"

इत्ययं छायाश्लोकः नीलमेघभिषक्कृत इति प्रस्तुतग्रन्थादवगम्यते ।

कालः ।

ग्रन्थकर्तुरस्य जीवितकालनिर्णयोपयोगि किमपि लक्ष्यं ग्रन्थतो न लभ्यते । अष्टाङ्गसंग्रहादनन्तरभवानां वैद्यग्रन्थानां स्मरणाभावादयं ग्रन्थकारस्तदनन्तरसन्निकृष्टकालजीवीति ज्ञायते ।

'सुन्दरीव्यञ्जिताकृति' मिति संग्रहविशेषणोक्त्यायमिदानीं प्रसिद्धाया अष्टाङ्गहृदयव्याख्यायाः सर्वाङ्गसुन्दरायाः कर्तुररुणदत्तस्यानन्तरजीवीति वक्तुं न शक्यते । मन्ये संग्रहस्यापि प्रसिद्धा काचित् 'सुन्दरी' इति व्याख्यासीत् सा चैतावत्पर्यन्तमनुपलब्धेति ।

अष्टाङ्गहृदयव्याख्यायाः सर्वाङ्गसुन्दरेति नामकरणमपि संग्रहस्य प्रसिद्धां सुन्दरीव्याख्यामुपजीव्यैवारुणदत्तेन तथाकृतमिति चेदानीं प्रतिभाति ।

संग्रहकर्ता रामगुप्तवाहटो बुद्धमतावलम्ब्यासीदिति तद्ग्रन्थोदाहरणैरेव

समर्थयितुं शक्यते । तस्मादयं बुद्धमतप्रचारकाले लब्धजीवितोऽभूदिति हेतोः भारतखण्डे बुद्धमतोन्मूलयितुः श्रीमच्छङ्कराचार्यात् प्राक्तन इति लक्ष्यते ।

केरळीयेन नरसिंहाचार्येण कृते रसवैशेषिकसूत्रभाष्ये केरळेषु लब्धप्रतिष्ठस्य सङ्ग्रहस्यास्मरणात् सङ्ग्रहकारो वाहटस्तदनन्तरकालोत्पन्न इति वक्तुं सुशकमेव । एवं च सङ्ग्रहकारः क्रैस्ताब्दीयाष्टमशतकपूर्वपादजीविनो नरसिंहाचार्यादनन्तरकालिकोः नवमशताब्दपूर्वार्धजीविनः शङ्कराचार्यात् प्राक्तन इति सुस्पष्टं भवति ।

मन्ये चाहं अष्टाङ्गसङ्ग्रहादेव समग्रमप्यायुर्वेदतत्त्वं सम्यग् ज्ञातवता तस्मिंश्च चरकादिष्विव परमप्रामाण्यबुद्धिं दधानेनानेन नीलमेघभिषजा स्वगुरोः सुन्दरभट्टाचार्यस्य समानकालिकयोश्चिरात् केरळदेशमलंकृतवतोः संग्रहकर्तुः साक्षाच्छिष्ययोरिन्दुजज्जटयोः सकाशादेव तद्रूपादिकं प्रत्यक्षत इव यथावदुपलब्धमिति ।

एवं च शब्दतस्तद्रूपं साक्षात्कृतवतानेन तद्रूपध्यानपरं पूर्वोक्तं पद्यं विरचितमिति च प्रस्पष्टं विदुषाम् ।

पूर्वोक्ताभिर्युक्तिभिरयं नवमशताब्दपूर्वार्धे लब्धजीवितोऽभूदिति निर्णेतुं शक्यते । एवं च नीलमेघभिषक् शङ्कराचार्यसमकालिको भवति । 'शङ्करात्मानमिन्दुशेखरमाश्रये' इत्यनेन पद्यांशेन शङ्कराचार्यो व्यङ्ग्यमर्यादया द्योतितो वा नवेति विद्वद्भिरेव निर्णेयम् ।

प्रस्तुतग्रन्थकारोऽष्टाङ्गहृदयकर्तारं वाष्टाङ्गहृदयं वा तद्व्याख्यां वा तत्कर्तारमरुणदत्तं वा न कुत्रापि स्वग्रन्थे स्मरति । अष्टाङ्गहृदयात् प्राचीनेऽस्मिन् ग्रन्थे तत्र तत्राष्टाङ्गसंग्रहादुद्धृतानां वाक्यानामवबोधनसौकर्यार्थमष्टाङ्गहृदयाध्यायश्लोकसंख्यादिकं यद्यपि मया प्रदर्शितं तथापि तेषां वाक्यानां संग्रहाष्टाङ्गहृदययोः साधारणत्वात् तथा कृतम् । एतेन तान्यष्टाङ्गहृदयादेवोद्धृतानीति माज्ञासिषत । किन्तु अष्टाङ्गहृदये परिचयाधिक्यात् सौकर्यानुरोधेनैवमाचरितमिति पण्डितैरवगन्तव्यमित्यभ्यर्थये ।

अष्टाङ्गहृदयकर्ता वाहटो वैदिकमतावलम्बी कश्चिदाचार्य आसीदिति तत्र तत्र वैदिकमन्त्रोद्धरणात् चैत्यादिगमननिषेधाच्च ज्ञायते ।

"जिनजिनसुततारामास्कराराधनानि
प्रकटितमलपापं कुष्ठमुन्मूलयन्ति ।"

इत्येतत् संग्रहपद्यप्रवृत्तेन्दुव्याख्यानात् जिनो बुद्ध इति जिनपुत्रोऽवलोकित इति चावगम्यते ।

पद्यमिदं चाष्टाङ्गहृदये "शिवशिवसुततारामास्कराराधनानी" त्येवं विवर्तितं दृश्यते । विवर्तनं चैतत् तत्कर्तुर्वैदिकमतावलम्बित्वं बुद्धमतपराङ्मुखतां च प्रदर्शयति ।

संग्रहकारपद्ये तृतीयतया स्मृता 'तारा' विश्वनिघण्टौ "बुद्धदेव्यां स्मृता तारा" इति दर्शनादियं काचित् प्रसिद्धा बुद्धयोगिनीति प्रतीयते । अष्टाङ्गहृदयकारस्मृता तु तारा

"अहल्या द्रौपती सीता
तारा मण्डोदरी तथा ।
पञ्चकन्यास्स्मरेन्नित्यं
महापापविनाशनम् ॥"

इत्यत्रोक्ता तारा स्यात् ।

'पाप्मभिः कर्मभिः सद्यः प्राक्तनै"रिति कुष्ठरोगस्य पापनिदानकत्वात् पञ्चकन्यास्वन्तर्भूतायास्तारायाः स्मरणं तच्छमनाय प्रभवतीति युक्तमेवैतत् । अथवा इह तारापदं पञ्चानामपि कन्यानामुपलक्षणम् ।

एवंरीत्या विचार्यमाणेऽष्टाङ्गहृदयकर्ता वाहटाचार्यः संग्रहकर्तुः पौत्रः प्रपौत्रो वा भवेत् । इत्थमष्टाङ्गसंग्रहाष्टाङ्गहृदयकर्त्रोर्मध्यकालजीवी सुन्दरशिष्यो नीलमेघभिषक् नवमशताब्दपूर्वार्धकालिक आसीदितीदं सर्वमुपपन्नं भवति ।

शास्त्रतत्त्वावगमार्थं तन्त्रयुक्तिविचारोऽत्यावश्यकः । सङ्ग्रहकारोऽप्यस्यात्यावश्यकतां

"अधीयानोऽपि तन्त्राणि तन्त्रयुक्त्यविचक्षणः ।
नाधिगच्छति तन्त्रार्थमर्थं भाग्यक्षये यथा ॥"

इति प्रतिपादयति । प्रकृतग्रन्थकर्ता च तमिमं श्लोकमनुस्मरति । तन्त्रकारेणोक्ता इमा देमास्तन्त्रयुक्तयो यद्यपीन्दुना व्याख्यातास्तथापि तासामर्थावबोधोऽस्मादेवग्रन्थात् सुस्पष्टो भवति । तस्मात्तन्त्रयुक्तिविचारो नामायं ग्रन्थोऽध्येतॄणामध्यापकानां पण्डितानां चोपकाराय महते स्यादिति मन्ये ।

अस्य चादर्शभूतो जीर्णत्रुटितपत्रः कश्चिद् ग्रन्थः प्रसिद्धेष्वष्टवैद्येष्वन्यतमाद् ओळश ब्रह्मश्री परमेश्वरसूनोर्नारायणार्यादुपलब्धः । आदर्शान्तरालाभात् तमिममेकमेवादर्शमाधारीकृत्यास्य संशोधनं कृतम् ।

वञ्चिमहामण्डलभरणनैपुणीचातुर्येण समस्तजगतामभूतपूर्वं प्रभूत परमानन्दमनवरतं सन्तन्यमानायाः, दिव्यनामधेयमुपाधीकृत्य प्रत्यग्रं प्रवर्त्यमानायां श्रीवञ्चिसेतुलक्ष्मीग्रन्थावल्यामायुर्वेदज्यौतिषपुरातनाप्रसिद्धविशिष्टग्रन्थप्रकटनेन लोकोपकारं नितरां कलयितुमभिलषन्त्याः प्रशस्तविख्यातसम्पत्प्रचुरिमविलसद्वञ्चिवसुन्धरापालवंशालङ्कारानर्घमुक्तामणि — भासुराकारायाः समधिगतसमस्तशास्त्रतत्वार्थसारायाः महोन्नतमहितमहामहिमशालिन्याः प्रत्यक्षलक्ष्म्या इव श्रीवञ्चिसेतुलक्ष्म्याः प्रसादभूतेन नियोगेनानुगृहीतोऽयं जनो यथामति परिशोध्यैतत् ग्रन्थरत्नं पण्डितवरेण्यानां समक्षं भक्तिबहुमानपुरस्सरं समर्पयति ।

विनेयो विधेयश्च,

अनन्तशयनम्,
४-७-१९२८.

कोळत्तेरि शङ्करमेनोन्.

॥ श्रीः ॥

तन्त्रयुक्तिविचारः ।

आत्तबुद्धिरवलोकितेश्वरात्
सङ्घगुप्तकुलसिन्धुचन्द्रमाः ।
रामगुप्त इह वाहटाख्यया
ख्यातिमान् स भिषगाविरस्तु नः ॥

लम्बश्मश्रुकलापमम्बुजनिभच्छायाद्युतिं वैद्यकान्
अन्तेवासिन इन्दुजज्जटमुखानध्यापयन्तं सदा ।
आगुल्फामलकञ्चुकाञ्चितवरालक्ष्योपवीतोज्ज्वलं
कण्ठस्थागरुसारमञ्जितदृशं ध्यायेद् दृढं वाहटम् ॥

आत्रेयपूर्वमखिलादिगुरून् महर्षीन्
आर्यावलोकितगुरुं पुनरार्यताराम् ।
श्रीसङ्घगुप्तमपि वाहटरामगुप्त-
माचार्यसुन्दरमपि प्रणतोऽस्म्यजस्रम् ॥

अष्टाङ्गानामधिष्ठानं सुन्दरीव्यञ्जिताकृतिम् ।
सङ्ग्रहं शङ्करात्मानमिन्दुशेखरमाश्रये ॥

"अधीयानोऽपि तन्त्राणि तन्त्रयुक्त्यविचक्षणः ।
नाधिगच्छति तन्त्रार्थमर्थं भाग्यक्षये यथा ॥"

(अ. सं. उ. २०)

काः पुनस्ताः कियत्यश्चेत्यत्राह---

[1] "तत्राधिकरणं योगो हेत्वर्थोऽर्थः पदस्य च ।
प्रदेशोद्देशनिर्देशवाक्यशेषाः प्रयोजनम् ॥
उपदेशापदेशातिदेशार्थापत्तिनिर्णयाः ।
प्रसङ्गैकान्तनैकान्ताः सापवर्गो विपर्ययः ॥
पूर्वपक्षविधानानुमतव्याख्यानसंशयाः ।
अतीतानागतापेक्षा स्वसंज्ञोह्यं समुच्चयः ॥
निदर्शनं निर्वचनं नियोगोऽथ विकल्पनम् ।
प्रत्युत्सारस्तथोद्धारः सम्भवस्तन्त्रयुक्तयः ॥
लीनव्यत्यासलेशोक्तिगदितार्थप्रकाशकाः ।
वाक्यन्यायोदधेः सारभूताः [2] षट्त्रिंशदीरिताः ॥"

(अ. सं. उ. ५०)

लक्ष्यलक्षणमनुक्रममासां लक्षितं स्वगुरुसुन्दरदृष्ट्या ।
वैद्यनाथ इति कल्पितनाम्ना नीलमेघभिषजा क्रियतेऽद्य ॥

अधिकरणम् (१) ।

तत्राधारोऽधिकरणं तात्पर्यं तत्र तिष्ठति ॥१॥

यथा---'कायबालग्रह' (अ. हृ. सू. १.१२) इत्यादौ कायादीनाधारीकृत्य तत्तद्रोगोपशमनकरी चिकित्सा वर्तते न त्ववस्थावयवभेदेन भिद्यमानानां तन्त्रस्याङ्गभूतानां कायादीनामिति तात्पर्यम् । आचार्येणापि 'चिकित्सा येषु संश्रिता' (अ. हृ. सू. १. ६) इत्युक्तं च । कायचिकित्साबालचिकित्सेत्यादिराधाराधेयसम्बन्धमात्रमेव । एवं स्थिते तन्त्रमिदमातुरापेक्षमेव । अनातुरविषयं तु दिनर्तुचर्याकथनमनुचितमेवेति

---

[1] 'तन्त्राधिकरणं' इति चरके ।

[2] 'षट्त्रिंशद्विचित्राभिर्भूषितं तन्त्रयुक्तिभिः ।' इति चरके । द्वात्रिंशदिति सुश्रुतः ।

चेत् तयोस्तु 'वयोहोरात्रिभुक्तानाम्' (अ. हृ. सू. २.८) इत्यादिनामयप्रशमनादिना कालकृतदोषापेक्षम् । तस्मादुभयथाप्यातुरापेक्षमिदं तन्त्रम् । 'इति कालस्वभावोऽयम्' (अ.हृ.सू.१२.२८) इत्याचार्येणोक्तम् । इत्यधिकरणम् ॥ १ ॥

योगः (२) ।

अथ,

योगः पदानामेकैकमर्थौचित्येन योजना ॥२॥

यथा——'रोगं निदानप्राग्रूपलक्षण' (अ. हृ. सू. १. २२) इत्यादौ आप्तिः सम्प्राप्तिः एवं दुष्टेन एवं स्थानस्थितेन एवमनुगतेन एवं मार्गेणेत्यादिना व्याधिपरिकल्पनम् । केन वा निदानविशेषेणास्य कुपितो दोषः दोषस्य ह्येकस्यापि बहवः प्रकोपहेतवः इत्यादियुक्त्या निदानस्य दुर्विज्ञेयत्वात् प्राग्रूपेण ज्ञानं तत्र च 'लिङ्गमव्यक्तमल्पत्वाद्' (अ. हृ. नि. १. ४) इत्यादियुक्त्या । तेनापि दुर्विज्ञाने लक्षणज्ञानम् । तत्रापि——

"आशङ्का ग्रहणीदोषपाण्डुगुल्मोदरादिषु ।"

(अ. हृ. नि. ७. २०)

इति च

"मारुतामग्रहोन्मादमदान् सुसदृशाकृतीन् ।
को जानीयाच्चिकित्सेद्वा दूरभिन्नक्रियाक्रमान् ॥"

(अ. सं. उ. ५०)

इति चोक्तत्वात् तेनापि दुर्लक्ष्यस्य तूपशयज्ञानम् । उपशयो नाम——

हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम् ।
औषधान्नविहाराणामुपयोगं सुखावहम् ॥
विद्यादुपशयं, व्याधेः" (अ. हृ. नि. १.६)

इत्यस्य हेतुविपरीते तु संतर्पणोत्थे अपतर्पणमौषधम् । गुरुस्निग्धशीताद्यन्नजे लघुरूक्षोष्णाद्यन्नम् । जागरोत्थे स्वापो विहारः ।

व्याधिविपरीते तु ज्वरे मुस्तापर्पटकादिरौषधम् । पेयादिरन्नम् ।

"ज्वरकालस्मृतिं चास्य हारिभिर्विषयैर्हरेत् ।"

(अ. हृ. चि. १. १७१)

इत्यादिविहारः । विपर्यस्तार्थकारी नाम उभयार्थकारी छर्द्यां छर्दनमित्यादि । इत्येवमुपशयज्ञानम् । एवं निदानादिचतुष्टयपरिपाटीज्ञानरूपत्वात् सम्प्राप्तेरन्तेऽभिधानम् । किञ्च सम्प्राप्तिवशाद्धि दोषत्रयस्य नानाविधरोगकारित्वम् । तेन रोगज्ञानानन्तरं भाविचिकित्साङ्गत्वात् तस्याप्यन्ते पाठः । तथा हि—

"मलास्तत्र स्वैः स्वैर्दुष्टाः प्रदूषणैः ।
आमाशयं प्रविश्यामपनुगम्य पिधाय च ॥"

(अ. हृ. नि. २. ३)

इत्याद्यौचित्यक्रमान्निदानानन्तरं योजना कार्या । इति योगः ॥२॥

हेत्वर्थः (३) ।

हेत्वर्थो हेतुनैव स्यात् तत्तदर्थप्रकाशनम् ॥३॥

यथा——'रोगस्तु दोषवैषम्यम्' (अ. हृ. सू. १. २९) इत्यादौ रोगो नाम दोषवैषम्यहेतुः । नतु दोषवैषम्यम् । तत्तु वृद्धिः क्षयो वा । अतो हेतोरेव रोगः । अत्र तुशब्देन रोगोऽपि दोषवैषम्यस्य हेतुरिति द्योतयति । उक्तं चागन्तुप्रकरणे कथं——'तेषु प्रहारेण पूर्वं रुजासम्भवः ततो दोषवैषम्यम्' (अ. सं. सू. २२) इति । तेन रोगोऽपि रोगस्य हेतुः यथा ज्वरो रक्तपित्तं वा ज्वरस्य इत्येवमादिर्हेत्वर्थः ॥३॥

पदार्थः (४) ।

पदार्थस्तु पदैक्येऽपि भिन्नमर्थं प्रकाशयेत् ॥४॥

यथा——'कोष्ठः क्रूरो मृदुर्मध्यः' (अ. हृ. सू. २. ९) इत्यादौ कफोत्तरः कोष्ठो मध्यः समकोष्ठोऽपि मध्यः । अत्र मध्यपदस्य न भेदः अर्थतस्तु मध्य इति सम एव ।

कथं—

"सुधाद्यैर्वातिकः (कोष्ठः) शम्याकाद्यैस्तु पैत्तिकः ।
श्यामाद्यैः श्लैष्मिको रेच्यः पथ्याद्यैः समदोषजः ।।"

इति * भेळकल्पोक्तत्वात् । समदोषजकोष्ठात् कफकार्यकोष्ठस्य तावान् भेदोऽस्त्येव यावांस्तदुत्कर्षः । आचार्येणापि लाघविकत्वात् पदैक्यमङ्गीकृत्य 'कोष्ठस्तु त्रिविधो भवति मृदुः क्रूरो मध्यश्च' (अ. सं. सू. ३९) इति कथितम् । अत्र विरेचनप्रस्तावोक्त्या पित्तकोष्ठस्य प्रथमग्रहणम् । अत्रापि तुशब्देन समदोषजपर्यायान्मध्यकोष्ठस्यात्रान्तर्भावः सूचित एव ।

"समं मध्यं च तुल्यं च समानं सदृशं सदृक् ।"

इति गोपालिकायामुक्तं च । अनेनाग्निरिव तदाश्रयः कोष्ठोऽपि चतुर्विध इत्यर्थः ।

केचित्तु

"पदार्थः पदभेदेऽपि न भेदः पुनरर्थतः ।"

इति । तन्मते तु द्रव्यौषधयोः पदभेद एव नार्थभेदः । यतः 'भिषग्द्रव्याणि' (अ. हृ. सू. १.२६) इत्यादिना 'बहुकल्पम्' (अ.हृ.सू. १.२८) इत्यादिना च सामान्येन द्रव्यौषधयोरभेद उक्तः । उक्तं च तान्त्रिकैः—

यस्मिन् रसादयो यच्च भौतिकीं मूर्तिमाश्रितम् ।
तद् द्रव्यं रसकल्कादि कल्पनासिद्धमौषधम् ।।"

एतावानवस्थाविशेषः । एवमन्यत्र 'शमनं कोपनम्' (अ. हृ. सू. १. २६) इत्यादिना 'शोधनं शमनम्' (अ. हृ. सू. १. २४) इत्यादिना च तयोरेव भेदाभास एव । उक्तं ह्याचार्येणापि 'द्विविधमौषधम् ऊर्जस्करं रोगघ्नं च । ऊर्जस्करमपि द्विविधं रसायनं वाजीकरणं च । रोगघ्नमपि द्विविधं रोगस्य प्रशमनमपुनर्भवकरं च । पुनश्च द्विविधं द्रव्यमद्रव्यं च । तत्र त्रिविधं द्रव्यं भौममौद्भिदं जङ्गमं चेति । तेषु तद्वक्ष्यमाणलक्षणं हेमादिलवणान्तमेतत् प्रायेण भौमम् । औद्भिदं पुनर्वनस्पतिवानस्पत्यवीरुदोषधिभेदेन चतुर्विधं भवति । तत्र फलिनो वनस्पतिः । पुष्प—

* मुद्रितभेळग्रन्थे पद्यमेतन्न दृश्यते ।

फलवान् वानस्पत्यः । वल्लीगुल्मं वीरुत् । फलपाकान्ता चौषधिरिति । जङ्गमोद्भवं मधुघृतादि । अद्रव्यं पुनरुपवासादि' (अ. सं. सू. अ. १२) इति तस्मादनयोर्नार्थभेदः । इति पदार्थः ॥४॥

प्रदेशः (५)

प्रदेशः क्वचिदुक्तानामन्यत्रोक्तैः समेतता ॥५॥

यथा—'कालार्थ' (अ. हृ. सू. १. १९) इत्यादौ कालः शीतोष्ण-वर्षलक्षणः, अर्थाः शब्दादय इन्द्रियार्थाः, कर्म कायवाङ्मनोभेदेन परत्र वेह वा कृतम् । तेषां हीनयोगातियोगमिथ्यायोगाः । हीनयोगोऽल्पः संयोगो नैव वा । अतियोगोऽतिमात्रम् । मिथ्यायोगो विपरीतलक्षणः । ते तु वातादिसमवेता एव रोगकारणं भवन्ति । वातादयोऽपि हीनयो-गादिसमवेता एव । अतः खल्वाचार्यस्य कालार्थकर्मेत्यादिश्च दोषा एव । हीनेत्यादिश्च रोगैककारणमित्युक्तिबलात् तयोरेकैकमिति यत् तदुभयमपि समवेतमेव रोगकारणं न पृथक् कारणमित्यर्थः । अतो रोगकारणस्य वातादिकोपस्य कालादिहीनयोगादयः प्रधानकारणमिति कारणे कार्योपचारः । इति प्रदेशः ॥५॥

उद्देशः (६) ।

उद्देशः समवायोक्तिरिति प्राहुर्मनीषिणः ॥६॥

यथा—सर्वथा वेगधारणं न कार्यमिति प्रतिपादनाय लाघविकेनापि सर्वानुग्राहकेणाचार्येण 'वेगान्न धारयेत्' (अ. हृ. सू. ४. १) इत्यादौ तत् पद्यमाकाङ्क्षाविषयमुद्दिष्टम् । इत्युद्देशः ॥६॥

निर्देशः (७) ।

निर्देशः स्याद् विवरणं पूर्वोक्तानामनुक्रमात् ॥७॥

यथा—वातवेगधारणे कृते गुल्मादयो जायेरन्, एवं विड्वेगादिष्वपि ज्ञेयम् 'अधोवातस्य रोधेन' (अ. हृ. सू. ४. २) इत्यादिना निर्दिष्टम् । पूर्वं वात इत्युद्दिश्य पश्चादधोवातस्येति विशेषग्रहणं पश्चादुद्गारवातविव-

क्षयेति बोद्धव्यम् । उद्देशनिर्देशयोरन्योन्यापेक्षिता स्यादेव । इति निर्देशः ॥७॥

वाक्यशेषः (८) ।

वाक्यशेषो विशिष्टार्थदायिनी वाक्यलक्षणा ॥७॥

यथा—'रोगानुत्पादनीयम्' (अ. हृ. सू. ४) इत्यनेन रोगोपशमनीयो ह्ययमध्याय इति लक्ष्यते । अन्यथा 'अनुत्पत्त्यै समासेन विधिरेष प्रदर्शितः' (अ.हृ.सू.४. ३४) इति वाक्यस्यानुचितत्वं स्यादेव । किञ्च 'धारयेत्तु सदा वेगान्' (अ. हृ. सू. ४. २५) इत्ययमनुचित एव । इति वाक्यशेषः ॥८॥

प्रयोजनम् (९)

प्रयोजनमनेकार्थसिद्ध्यै पदनिवेशनम् ॥९॥

यथा—'वायुः पित्तं कफश्च' (अ. हृ. सू. १. ६) इत्यादिना पदनिवेशने ते वातादयः पृथगपि दोषाः चशब्दात् समवेता अपि दोषाः । समासत इति आमपूयादयो विस्तरतोऽपि दोषाः । इति अनेन प्रकारेण । प्रकारान्तरेण रजस्तमश्चेत्यादिना तयोरपि दोषत्वम् । त्रय इति वातादिभेदानामपि दोषत्वं लक्षितम् । एवमनेकार्थसिद्धिः। इति प्रयोजनम् ॥९॥

उपदेशः (१०)

उपदेश इदन्त्वेवमेवन्त्वादिनकल्पना ॥१०॥

यथा—

"यस्माद् दृष्टो यवस्स्वादुर्गुरुरप्यनिलप्रदः ।
दीपनं शीतमेवाज्यं वसोष्णाप्यग्निसादनी ॥
कटुपाकोऽपि पित्तघ्नो मुद्गो माषस्तु पित्तलः ।
स्वादुपाकोऽपि चलकृत् स्निग्धोष्णं गुरु फाणितम् ॥
रसः स्वादुर्यथा चैवं तथान्येष्वपि दृश्यते ।
वातलं कफपित्तघ्नमम्लमप्यक्षकोफलम् ॥

कुरुते दधि गुर्वेव वह्नि पारावतं न तु ।
कपित्थं डाडिमं चाम्लं ग्राहि नामलकीफलम् ।।
कषाया ग्राहिणी शीता धातकी न हरीतकी ।
अप्रधानं पृथक् तस्माद् रसाद्याः संश्रितास्तु ते ।।
प्रभावश्च यतो द्रव्ये द्रव्यं श्रेष्ठमतो मतम् ।"

(अ. सं. सू. १७)

इत्याचार्येणैव प्रतिपादितं द्रव्यमिति प्रभावपरम् । 'द्रव्यमिति प्रभावपरनामा द्रव्यशक्ति' रितीन्दुनापि प्रतिज्ञातम् । प्रभावशक्त्योरग्न्यूष्मणोरिव भेदः कल्प्यः । इत्युपदेशः ।।१०।।

अपदेशः (११) ।

अपदेशस्तु कण्ठोक्तं वाक्यमर्थेन दर्शयेत् ।।११।।

यथा—'उष्णोदकोपचारी स्यात्' (अ. हृ. सू. १६. २५) इत्यादौ शीतोदकं न स्पृशेदिति । व्यवायं न सेवेत, दिवा न स्वप्यात् इत्यादौ पुनरहःस्वप्ननिषेधस्तु दिवास्वप्नोचितानामपि स्नेहविषये निषेधप्रतिपादनाय । इत्यपदेशः ।।११।।

अतिदेशः (१२)

अतिदेशस्तु पूर्वोक्तन्यायस्यान्यानुषङ्गिता ।।१२।।

यथा—'रोगाः सर्वेऽपि जायन्त' (अ. हृ. सू. ४. २३) इत्यादौ वेगधारणानुषङ्गेण वेगोदीरणस्य तस्य (व ? वा) ग्रहणे सर्वरोगजनकप्राधान्यं सूचितम् । उदीरणं धारणं च प्रयत्नविशेषः । अत्र बहुवचननिर्देशो वेगलक्षितान् वातादीनुद्दिशति । इत्यतिदेशः ।।१२।।

अर्थापत्तिः (१३) ।

अर्थापत्तिः सहोक्तेभ्योऽप्येकस्यार्थोऽन्यथापतेत् ।।१३।।

यथा—

"आमविष्टम्भयोः कोष्णं निष्पिपासोऽप्यपः पिबेत् ।"

(अ. सं. सू. ६)

इत्यनेन विदग्धे दुष्टपित्तोपशमनाय पिपासितस्यैव 'शृतशीतोदकं दद्यादि' त्यर्थादापतितम् । उष्णशीतस्वादुपाकत्वं च शीतवीर्यत्वं च साधारणमेव ।

"पाके स्वादु हिमं वीर्ये तदुष्णमपि योजितम् ।
तस्मादयोगपानेन लाघवान्न वियोजयेत् ।।"

(अ. सं. सू. ६)

इत्युक्तत्वात् । 'लाघवान्न वियोजयेत्' इत्यस्य 'स्वल्पत्वं तस्य *न चापनेयम् इतीन्दुनापि व्याख्यातम् । इत्यर्थापत्तिः ।।२३।।

निर्णयः (१४) ।

निर्णयः स्थापयेदर्थमनेकविधमेकधा ।।१४।।

यथा—'वीर्यं तु केचिद् गुरुलघुस्निग्धरूक्षमन्दतीक्ष्णशीतोष्णभेदादष्टविधमाहुः । अपरे पुनर्बहुवीर्यवादिनः पठन्ति'—

"वीर्यं द्रव्यस्य तज्ज्ञेयम् यद्योगात् क्रियते क्रिया ।
नावीर्यं कुरुते किञ्चित् सर्वा वीर्यकृता हि सा ।।"

(अ. सं सू. १७)

इति । 'तैरपि चैवमतिप्रकृष्टशक्तियुक्तानामशेषौषधगुणसारभूतानामष्टानामेव गुर्वादीनां वीर्यसंज्ञा विशिष्टाम्नायविहितापि लौकिकीति समुद्भाव्यते । तथाहि । तया रसविपाकगुणान्तरविजयिनो भूयांसश्च वरिष्ठाश्च गुणाः संगृहीताः । विशेषवृत्त्या च तत्र तत्र द्रव्यस्वरूपकथने व्यवहारः प्रवर्तितो भवति । अतएव सर्वातिशायी द्रव्यस्वभावः प्रभाव इत्याम्नातः । सत्यपि च क्रियानिवर्त्तनसामान्ये तद्विपरीता रसादयो वीर्याख्यया प्रभावसंज्ञया वा न परामृश्यन्ते ।

अन्ये तु गुर्वादीनामग्नीषोमात्मकत्वाद् आदानविसर्गविभागेन कालस्य चोष्णशीतात्मकत्वाद् द्विविधमेवामनन्ति । एवं चाहुः—

"नानात्मकमपि द्रव्यमग्नीषोमौ महाबलौ ।
व्यक्ताव्यक्तं जगदिव नातिक्रामति जातुचित् ।।"

---

* 'न चालनीयम्' इति मुद्रितपाठः ।

तत्रोष्णं दहनपचनस्वेदनविलयनानिलकफशमनादीनि करोति । शीतं ह्लादनस्तम्भनजीवनरक्तपित्तप्रसादनादीनि करोति' (अ. सं सू. १७) इति वीर्यद्वैविध्यमाचार्येण स्थापितम् 'उष्णशीतगुणोत्कर्षादि'त्यादिना वाक्येन । इति निर्णयः ।।१४।।

प्रसङ्गः (१५)

प्रसङ्गः पूर्वमुक्तानां भूयोऽपि प्रतिपादनम् ।।१५।।

यथा—'आमाशयं प्रविश्याममनुगम्य' (अ. हृ. नि. २. ४) इत्यादिना प्रोक्तमर्थम् 'आमाशयस्थो हत्वाग्निम्' (अ. हृ. चि. २. २) इत्यादिना भूयोऽपि प्रतिपादितवानाचार्यः । तत्र तु एवंभूतस्य ज्वरस्य लङ्घनं कार्यं नेतरस्येति 'शुद्धवात' (अ. हृ. चि. १. २२) इत्यादिना वक्ष्यति । इति प्रसङ्गः ।।१५।।

एकान्तः (१६)

एकान्त एवमेवैष नान्यथेति व्यवस्थितिः ।।१६।।

यथा—

"अष्टादशाष्टदशकान् वस्तीनां यो निषेवते ।
विधिना ना यथोक्तेन स भवेदरुजोऽजरः ।।"

(अ. सं. सू. २८)

इत्यत्र कर्मकालयोगाख्यानां स्नेहवस्तीनां यो निषेवते अष्टादशकान् विधिना, 'प्राक् स्नेह एकः पञ्चान्त' (अ. हृ. सू. १९. ६३) इत्यादिना ग्रन्थोक्तप्रकारेणाष्टादश पर्यायान् सेवेत इत्यनेन क्रमेणानुवासनानि त्रीणि शतानि चतुर्विंशत्यधिकानि भवन्ति इत्येष कर्मवस्तिः । सोऽश्रुते तूक्तमष्टादशविधत्वमस्य ।

"दत्तस्तु प्रथमो वस्तिः स्नेहयेद् वस्तिवङ्क्षणौ ।।
सम्यग् दत्तो द्वितीयस्तु मूर्धस्थमनिलं जयेत् ।।

[1]बलं वर्णं च जनयेत् तृतीयोऽथ विशेषतः ।
चतुर्थः स्नेहति रसं रक्तं स्नेहति पञ्चमः ।।
मांसं स्नेहति षष्ठस्तु मेदः स्नेहति सप्तमः ।
[2]अष्टमो नवमश्चैवमस्थि मज्जानमेव च ।।
तथा शुक्लास्रगान् दोषान्नवापि नव वस्तयः ।

(सु. चि. ३७. ७४)

वातादिकुणपग्रन्थिपूयक्षीणमलाह्वयम् ।।
बीजासमर्थं रेतोऽस्रं स्वलिङ्गैर्दोषजं वदेत् ।।"

(अ. हृ. शा. १. १०)

इत्याद्यनेन शुक्लास्रगा नव दोषाः ज्ञातव्याः । मलशब्देन मूत्रशकृद्गन्धावुक्तौ इत्यष्टादशकम् एवं वस्तयस्त्रिंशत् पृथगीरिताः । 'नासेवेत' इति पुंस्त्रियोर्ग्रहणम् । अन्यत्रापि—

"दद्यान्निरूहान्तरितांस्त्रीन्नवाष्टादशैव तु ।
स्नेहवस्तिक्रमो ह्येष शुक्लरक्तप्रसादनः ।।"

इत्यत्र त्रीन्नवेति द्वादशास्थापनानि अष्टादशेति स्नेहवस्तयः । सान्वासनानीति सहशब्दः प्राधान्ये सेन्द्राः सुरा इव । अग्रकालवस्तेस्तु कालः पञ्चदशेत्यादिनोक्तप्रकारेण शतम् । अशीतिस्नेहा नवतिरास्थापनानीति सर्वं सप्तत्यधिकं शतद्वयम् अत्र वस्तिरिति निरूहः ।

---

[1] 'जनयेद्बलवर्णौ च तृतीयस्तु प्रयोजितः ।
रसं चतुर्थो रक्तं तु पञ्चमः स्नेहयेत्तथा ।।
षष्ठस्तु स्नेहयेन्मासं मेदः सप्तम एव च ।।'

इति मुद्रितसौश्रुतपाठः ।

[2] 'अष्टमो नवमश्चास्थि मज्जानं च यथाक्रमम् ।
एवं शुक्रगतान् दोषान् द्विगुणः साधु साधयेत् ।।'

मुद्रितसुश्रुते ।

योगवस्तेस्तु योगोऽष्टौ वस्तयोऽत्रेत्यादिनोक्तप्रकारेण नवति स्नेहाः पञ्चाशच्चत्वार्यास्थापनानि चतुश्चत्वारिंशदधिकं शतं विद्यात्। तेन मरुच्छमं न प्रधानं कर्मादीनामुत्कृष्टदोषनिर्हरणार्थम् अङ्गभूतान्यास्थापनानि। यतः—

"स्नेहेन रौक्ष्यं लघुतां गुरुत्वा-
दौष्ण्याच्च शैत्यं पवनस्य हृत्वा।
तैलं दधात्याशु मनःप्रसादं
स्नेहं बलं वर्णमतीव पुष्टिम्॥"

इति वचनात्। तत्रैव

"अन्यजन्मकृतं कर्म दैवं पौरुषमैहिकम्।
विद्यात्ते कर्मणी त्रेधा श्रेष्ठमध्यावरत्वतः॥"

इत्याद्युक्तन्यायेन

"दैवपौरुषकर्मभ्यामुत्कृष्टाभ्यामुदीरितात्।
व्याधीन् जित्वा बलं कुर्यात् कर्मवस्तिस्ततः स्मृतः॥
ताभ्यामेव च मध्याभ्यामथानियतकालजान्।
व्याधीन् जित्वा सुखं कुर्यात् कालवस्तिस्ततः स्मृतः॥
अथाभ्यामेवावराभ्यां यो व्याधीन् विनिहत्य तान्।
देहं सुखायुषा युञ्ज्याद् योगवस्तिस्ततः स्मृतः॥"

इत्येकान्तः॥१६॥

नैकान्तः (१७)

एवं स्यादथवा नैवमिति नैकान्त ईरितः॥१७॥

यथा—'शीते वसन्ते च' (सु. चि. ३७. ५१) इत्यादि शीतवसन्तयोर्हेमन्तशिशिरवसन्तेषु दिवाऽनुवासयेत्। अन्यदा ग्रीष्मवर्षाशरत्सु रात्राविति सिद्धम्। केचिच्छीते वसन्ते च रात्रावन्यदा दिवेति। अन्ये पुनः केचिच्छब्दस्य काकाक्षिन्यायमापाद्य केचित् सर्वदा रात्राविति।

केचित्तु तत इति रात्र्युत्तरकालस्यान्यदात्वमापाद्य सर्वदा दिवेति । तेन शीते वसन्ते च दिवा ग्रीष्मवर्षाशरत्सु रात्राविति एकः पक्षः । सर्वदा रात्रावित्येकः पक्षः । सर्वदा दिवेत्यन्यः । इति पक्षत्रयम् । दिवापक्ष एवमाह—

* "न रात्रौ प्रणयेद् बस्तिं दोषोत्क्लेशो हि रात्रितः ।
स्नेहवीर्यमतः कुर्यादाध्मानं गौरवं ज्वरम् ।।
अह्नि स्थानस्थिते दोषे वह्नौ चान्नरसान्विते ।
स्फुटस्रोतोमुखं देहं स्नेहौजः परिसर्पति ।।"

(सु· चि· ३७)

अन्यस्तु

"न दिवा योजयेद् बस्तिं दिवा स्वप्नप्रसङ्गतः ।
दिवा स्वप्नो हि कुरुते कफपित्तात्मकान् मलान् ।।
शीते वसन्ते च दिवाऽनुवास्यो
रात्रौ शरद्ग्रीष्मघनागमेषु ।
तानेव दोषान् परिरक्षता; ये
स्नेहस्य पाने परिकीर्तिताः प्राक् ।।" (च· सि· १· २२)

इति । स्नेहपानदोषाश्च—

"अत्युष्णे तु दिवा पीतो वातपित्ताधिकेन वा ।
मूर्च्छां पिपासामुन्मादं कामिलां च समीरयेत् ।।
शीते रात्रौ पिबन् स्नेहं नरः श्लेष्माधिकोऽपि वा ।
आनाहमरुचिं शूलं पाण्डुतां च समृच्छति ।।"

(च· सू· १३· २०)

आचार्योऽपि मतमिदमङ्गीकृत्य 'शिशिरवसन्तयोर्दिवा' (सं· सू· २७) इत्यादिना पूर्वमुक्तवान् । पुनश्च दोषानुसारेणाह—

---

* 'रात्रौ बस्तिं न दद्यात्तु दोषोत्क्लेशो हि रात्रिजः ।
स्नेहो वीर्ययुतः कुर्यादाध्मानं गौरवं ज्वरम् ।।'

इति मुद्रितसौश्रुतपाठः ।

"अल्पपित्तकफं रूक्षं भृशं वातरुजार्दितम् ।
भुक्तं जीर्णाशनं कामं रात्रावप्यनुवासयेत् ॥"

(सं सू. १७)

भुक्तमिति जीर्णाशनं, भुक्तमन्यथा—

"अभुक्ते रिक्तकोष्ठस्य प्रयुक्तमनुवासनम् ।
सरद्रूरगसूक्ष्मत्वैः क्षिप्रमूर्ध्वं प्रपद्यते ॥
तेन वायोर्जयो न स्याद् वातधामन्यतिष्ठता ।
कायाग्नेराशु नाशश्च विशेषादनिवर्तनात् ॥
*स्नेहः सद्योशिताहाररुद्धे त्वामाशयेऽनिलम् ।
पक्वस्थं हन्ति पक्वस्थश्च्यवते चान्नपाकतः ॥
भुक्तवाननुवास्योऽस्मान्न निरूह्यस्तु भुक्तवान् ।
निरूहश्च समीरश्च तीक्ष्णवेगावुभावपि ॥
तावन्न मूर्छितौ तीक्ष्णावधोऽन्नेन सहागतौ ।
ऊर्ध्वं वा शकृता सार्धं संस्थितौ कोष्ठ एव वा ॥
सममाहारविष्टब्धौ हरेतामाशु जीवितम् ।"

अवेक्ष्य वा दोषादीनीति चाचार्यपक्षः । इति नैकान्तः ॥१७॥

(अ. सं. सू. २८)

अपवर्गः (१८) ।

अपवर्गस्त्वनौचित्यादितरोक्त्यपवर्जनम् ॥१८॥

यथा—'रसाः स्वादु' (अ. हृ. सू. १-१४) इत्यादिना रसषट्कमुक्तमाचार्येण "असंख्येया रसा इति काङ्कायनः" । 'एको रस इति भद्रकाप्यः' (च. सू. २६-८) तत्पक्षास्त्वेवमाहुः—

"मधुरस्कन्धनिर्दिष्टघृतहेमगुळादिषु ।
[1]रसा स्वाद्वादिभेदेन रसषट्कं न युज्यते ॥

---

* मुद्रितसंग्रहे इदमेकं पद्यमधिकं दृश्यते ।

1 'गुणाः' इति,

अस्तु भेदादसंख्यत्वमैक्यं वा स्वादुलक्षणात् ।
भूतोत्कर्षापकर्षेण भेदो योऽल्पेन [1]कथ्यते ।।
सङ्कीर्णत्वात् फले चासौ तुल्यत्वान्न विवक्ष्यते ।
गुर्वादीनां विशेषेऽपि स्वजातेरनतिक्रमात् ।।
संख्याभेदो यथा नास्ति रसानामपि स क्रमः ।
दृष्टं मुखोपलेपादि यत् सर्वेषु घृतादिषु ।।
न च तद्दाडिमाद्येषु षडेवातो रसाः स्मृताः ।
आनन्त्यैकत्वयोश्च स्यान्न विचित्रार्थतन्त्रणम् ।।"

(अ. सं. सू. १७)

इत्यनेनेतरापवर्जनेन "रसः खल्वाप्यः प्रागव्यक्तश्च । स षड्ऋतुकत्वात् कालस्य, महाभूतगुणैर्न्यूनातिरिक्तैः संसृष्टो विषमं विदग्धः षोढा पृथग्विपरिणमते मधुरादिभेदेन ।" (अ. सं. सू. १८)

"क्रमेण तिक्तः शिशिरे, कषायो
वसन्तकाले. कटुको निदाघे ।
अम्लोऽथ वर्षासु, पटुस्तदन्ते
स्वादुर्हिमे चेत्युदभावि भूतैः ।।"

इत्यादिना च रसषट्कत्वं स्थापितमाचार्येण इतरापवर्जितम् । इत्यपवर्गः ।।१८।।

विपर्ययः (१९) ।

उक्तार्थवैपरीत्येन लक्षणं स्याद् विपर्ययः ।।१९।।

यथा—'ज्वरोपद्रवतीक्ष्णत्वम्' (अ. हृ. नि. १. ५४) इत्यादिना सामज्वरलक्षणं प्रदर्श्य तद्विपर्यासेन पक्वज्वरलक्षणं प्रदर्शितम् । तत्र तु "सप्तरात्र"मिति लक्षणान्तरकथनं तदर्वागपि पक्वज्वरलक्षणं यदि न प्रतिपत्तव्यम् ।

---

1 'कल्प्यते' इति च पाठभेदः ।

"सप्ताहे[1]नैव पच्यन्ते स[2]प्तधातु गता मलाः ।"

(च. चि. ३. २७२)

इति वचनात् सप्ताह एव पक्वलक्षणमङ्गीकार्यम् ।

"चिरेणापि हि पच्यन्ते सन्निपातज्वरे मलाः ।"

इति वचनात् सप्ताहादूर्ध्वमप्यामलक्षणं चेत् तदा पाचनकषायः कल्पनीय इति तात्पर्यम् । इति विपर्ययः ॥१९॥

केचिदत्र सन्धिविशेषादकारमापाद्याविपर्यय इत्याहुः । तत्पक्षे तु—

(अविपर्ययः ।)

अपेतविपरीतार्थमविपर्ययमादिशेत् ।

यथा—

"[3]मारुते लवणं सर्पिः पित्ते केवलमिष्यते ।
वैद्यो दद्याद् बहुकफे क्षारत्रिकटुकान्वितम् ॥"

(अ. सं. सू. २५)

इति ।

"न सर्पिः केवलं पित्ते पेयं सामे विशेषतः ।
सर्वं ह्यनुव्रजेद् देहं हत्वा संज्ञां च मारयेत् ॥"

(च. सू. २३. ७४)

इत्यनेन विरोध इति । सत्यं तन्न । स्नेहपाने विचारणा वाच्छपान- मिति द्विधा प्रयोगः । 'युक्त्यावचारयेत् स्नेहं भक्ष्याद्यन्नेन' (अ. सं. सू. २५) इत्यादिना प्रोक्ता विचारणा । अच्छस्तु—

"यथोक्तहेत्वभावाच्च नाच्छपेये विचारणा ।
स्नेहस्य कल्पः स श्रेष्ठः स्नेहकर्माशुसाधनात् ॥"

(अ. सं. सू. २४)

---

[1] 'हेन हि' इति, [2] 'सर्वधातुगता' इति च मुद्रितचरके ।

[3] 'वाते सलवणं' इति पाठभेदः ।

इति द्विविधम् । अल्पमात्रं चार्यत इति चारणा। अस्याच्छपेयस्य तु मात्राभेदोऽस्ति—

"द्वाभ्यां चतुर्भिरष्टाभिर्यामैर्जीर्यन्ति याः क्रमात् ।
ह्रस्वमध्योत्तमा................. ।" (अ. सं. सू. २५)

इति कल्पिताः ॥

"ह्यस्तने जीर्ण एवान्ने स्नेहोऽच्छः शुद्धये बहु ।"

(अ. सं. सू. २५)

इत्युत्तममात्रस्याच्छपेयस्यावस्था कल्पिता । 'शमनः क्षुद्वतोऽनन्न' (अ. हृ. सू. २६-१८) इत्यादिना च मध्यह्रस्वयोः कल्पिता ।

"बृंहणोरसमद्याद्यैस्सभक्तोऽल्पो हितः, स च ।
बालवृद्धपिपासार्तस्नेहद्विण्मद्यशीलिषु ।
स्त्रीस्नेहनित्यमन्दाग्निसुखितक्लेशभीरुषु ।
मृदुकोष्ठाल्पदोषेषु काले चोष्णे कृशेषु च ॥"

किञ्च,

"स्नेहः प्राग्भोजनात् कुर्याद्रुजङ्घाकटीबलम् ।
वेगानुलोम्यमारोग्यमधः कायगदक्षयम् ॥
मध्ये बृहत्त्वाग्निबलस्थिरताकुक्षिरुक्छमान् ।
इन्द्रियस्थिरतामूर्ध्वमूर्ध्वजत्रुगदक्षयम् ॥"

(अ. सं. सू. २५)

तेष्वपि दोषबलादीन्यवेक्ष्य

"मारुते लवणं सर्पिः पित्ते केवलमिष्यते ।"

इत्यस्य सभक्तस्य यामद्वयजरणलक्षणमात्रस्य केवलस्याच्छपानस्य विषयत्वम् । इन्दुनापि केवलस्याच्छं बहु चेति व्याख्यातम् । तदच्छं पित्तोद्रिक्तस्य स्वभावत एव तीक्ष्णाग्नेः शुद्धये न पेयमेव तथा सति—

"स्नेहेन पैत्तिकस्याग्निर्यदा तीक्ष्णतरीकृतः[1] ।
स्नेहमाशु जरां नीत्वा पुनरोजोऽभितश्चरन् ॥

[1] 'तीव्रतरीकृतः' इति पाठभेदः ।

उदीरयेत् सोपसर्गां पिपासामस्य बाधिकाम् ।
सोऽसूँस्त्यजेद् यद्युदकं न पिबेदाशु शीतलम् ।।
शीतसेकावगाहादींश्च तृष्णापीडितो भजेत् ।
स्नेहाग्निना दह्यमानः स्वविषेणेव पन्नगः ।।"

(अ. सं. सू. २५)

इत्युक्तत्वात् सामे विशेषतोऽच्छं न पेयम् । यदा तु

"अजीर्णे, बलवत्यां तु शीतैर्दिह्यात् सिरामुखम् ।
छर्दयेत् मदशान्तौ वा पीत्वा शीतोदकं पुनः ।।
रूक्षान्नमुल्लिखेद् भुक्त्वा तादृश्यान्तु कफानिले ।
समदोषश्च निश्शेषं स्नेहमुष्णाम्बुनोद्धरेत् ।।"

(अ. सं. सू. २५)

तस्मात् पित्तकृतैः पित्तोद्रेके रोगे काले तीक्ष्णाग्नेः शुद्धये बहुमात्रमच्छं न पेयम् । तस्य तु योग्याः—

"महादेहानलबलक्षुत्तृट्क्लेशसहिष्णुभिः ।
गुल्मोदावर्तवीसर्पसर्पदंशाभिपीडितैः ।।
उन्मत्तैः कृच्छ्रमूत्रैश्च महती शीघ्रमेव सा ।
सर्वमार्गानुसारेण जयेद् व्याधीन् सुयोजिता ।।"

(अ. सं. सू. २५)

इत्यत्र पैत्तिको न परिगृहीतः । तस्य तु स्नेहपरिहारासहिष्णुत्वाद् बृंहणं शमनं शस्तम् । अथवा "ताभ्यश्च ह्रसीयसीं कल्पयेत्" इति युक्त्या तदुचिता कापि मात्रा कल्पनीया ।

"पञ्चचतुःस्नेह (प) स्य मुहूर्तैर्न्यूनपादिकैः ।
पाकं याति समे त्वग्नौ विकल्प्यं मन्दतीक्ष्णयोः ।।"

इति हि तन्त्रोक्तिः । अन्यच्च—

"त्र्यहमच्छं मृदौ कोष्ठे क्रूरे सप्तदिनं पिबेत् ।"

(अ. सं. सू. २५)

इत्यत्र मध्यकोष्ठस्य पातुः पञ्चषड्हेष्वेकः कल्प्यत एव । "मात्राया न व्यवस्थास्ति" इत्यादिश्चाचार्यव्यवहारः । तस्मादत्राविपर्ययः ॥१९॥

पूर्वपक्षः (२०) ।

पूर्वपक्षस्तु पूर्वेषां पक्षेष्वप्यात्मपक्षता ॥२०॥

यथा—'चय एव जयेद् दोषान्' (अ. हृ. सू. १३. १५) इत्यादौ चयकाल एव कुपितदोषाविरोधेन दोषाञ्जयेत् । चयो द्विविधः । कालजोऽपथ्याहारतश्च ।

"इति कालस्वभावोऽयमाहारादिवशात् पुनः ।
चयादीन् यान्ति सद्योऽपि दोषाः कालेऽपि वा न तु ॥"

अ. हृ. सू. १२. २७)

इत्याचार्यवचनात् अपथ्याहारजं दोषचयं तत्काल ए (व) शमयेत् । कालजं तु—'शीतोद्भवं दोषचयं वसन्ते' (अ. हृ. सू. ४.) ३५) इति वचनात् कोपकालादावेवमुन्मार्गतायाः पूर्वमित्याशु प्रयोगः । तदा शोधयेत् चय एव इत्यत्र एवशब्दादेतद् द्योतयति—

"चयकाष्ठामुपारुह्य कुर्वते ते ह्युपेक्षिताः ।
प्रायशः सुचिरेणापि भेषजद्वेषिणो गदान् ॥"

इत्यतो हेतोः सद्यः शमयेत् । तथा

"सर्वकोपे बलीयांसं शेषदोषाविरोधतः ।
क्रमान्मरुत्पित्तकफान् सर्वत्र सदृशे बले ॥
वातादीनां यथापूर्वं यतः स्वाभाविकं बलम् ।"

(अ. सं. सू. २१)

अस्य संवादः—

"ऊचे पराशरोऽप्यर्थममुमेव प्रमाणयन् ।
यथोपन्यासतः प्राप्तमाद्ौ दोषभिषग्जितम् ॥
नेतुमङ्गेन दृष्टो हि समं सैन्यपराजयः ।"

(अ. हृ. सू. २१)

पक्षान्तराणि.

"स्थानतः केचिदिच्छन्ति प्राक् तावच्छ्लेष्मणो वधम् ।
शिरस्युरसि कण्ठे च प्रलिप्तेऽन्नरुचिः कुतः ।।
तदभावे कथं भोज्यपेयद्रव्यावचारणम् ।
असत्यभ्यवहारे च कुतो दोषविनिग्रहः ।।
तस्मादादौ कफो घात्यः कायद्वारार्गलो हि सः ।
मध्यस्थायि यतः पित्तमाशुकारि च चिन्त्यते ।।
अतो वायुसखस्यास्य कुर्यात् तदनु निग्रहम् ।
अत एव च पित्तादिः कफान्तोऽन्यैः क्रमः स्मृतः ।।
सुश्रुतस्य[1] न सर्वत्र मतमेतद् ब्रवीमि[2] तु ।
जयेज्ज्वरेऽतिसारे च क्रमात् पित्तकफानिलान् ।।
प्रायेण तापात्मतया ज्वरे तेजो विशिष्यते ।
विशेषाद्[3] विसरं पित्तात् तथाच मृदुकोष्ठता ।।
तस्य चानुबलः श्लेष्मा गौरवापक्तिजाड्यकृत् ।
वायुश्च वर्धतेऽवश्यं यात्स्वहस्सु[4] तयोः क्षये ।।
ज्वरातिसारयोस्तस्मादेष दोषजये क्रमः ।
कफपित्तानिलानन्ये क्रमादाहुस्तयोरपि ।।
तस्मादामाशयोत्क्लेशाद् भूयिष्ठं तत्समुद्भवः ।
"क्रमणाद्येन" (अ. सं सू. २१)
इति पित्तादिना अनन्तरेष्वात्मपक्षान्तर्भावः ।

"तत्रापि"

विशिष्टः स्वपक्षः ।

"प्रवृद्धान् स्वाश्रये स्थितान् ।
स्वाश्रयेषु प्रदुष्टानां स्थितैव ह्याशुकारिता ।।

---

1 'श्च' इति मुद्रितसंग्रहपाठः । 2 'ब्रवीति' इति पाठभेदः ।
3 'विशश्च सरणं' इति मुद्रितसंग्रहे । 4 'येष्व' 'यस्त्त', इति पाठान्तरौ ।

विज्ञाय कर्मभिः स्वैः स्वैर्दोषोद्रेकं[1] यथायथम् ।
भेषजं योजयेत्तत्तत् तन्त्रीकुर्यान्न तु क्रमम् ।।"

(अ. सं. सू. २१)

इति पूर्वपक्षः ।।२०।।

विधानम् २१

अनन्वितानामर्थानां विधानं संविधानकृत् ।।२१।।

यथा—

कफः पित्तं मलाः खेषु प्रस्वेदो नखरोम च ।
स्नेहोऽक्षित्वग्विशामोजो धातूनां क्रमशो मलाः ।।"

(अ. हृ. शा. ३. ६३)

इत्योजसो मलत्वमुक्तम् । अन्यत्र तु अत्यन्तशुद्धतया चास्य मलासम्भव इति चोक्तम् तत् कथमिति चेद् ब्रूमः । धातूनां क्रमप्राप्तिः युगपत्प्राप्तिश्चेति वहनद्वैविध्यमस्त्येव । उक्तं च—

"तत्राहाररसो हि व्यानविक्षिप्तो यथास्वं सप्तसु धात्वग्निषु क्रमात् पच्यमानः स्वात्मकाल[2]प्रच्युतिसम[3]कालमेव प्राप्तरक्तादिधातुसंज्ञः कालवदस्खलितबलप्रमाणो देहमूर्जयन्[4] धातून् धातुमलांश्च पुष्णाति" (अ. सं शा. ६) ।।

अथार्धकिट्टमच्छं मूत्रम् । घनं शकृत् । रसस्य सारो रक्तम् । मलः कफो लसीका च । रक्तस्य सारो मांसं कण्डराः सिराश्च । मलः पित्तम् । मांसस्य सारो मेदस्त्वचो वसा च । किट्टं कर्णनासाक्षिरोमकूपप्रजननमलाः । शुक्लस्य सारमोजः । अत्यन्तशुद्धतया चास्य मलासम्भवः । अत एवान्येऽपि अस्य नेच्छन्ति पाकम् ।" (अ. सं. शा. ६) उक्तं च तैः—

---

1 'बलम्' इति मुद्रितसंग्रहे । 2 स्वात्मभाव इति, 3 'समनन्तरमेव' इति, 4 'मूर्जयित्वा' इति च पाठभेदः ।

"कफः पित्तं मलाः खेषु प्रस्वेदो नखरोम च ।
नेत्रविट्त्वक्षु च स्नेहो धातूनां क्रमशो मलाः ॥"

(अ. सं शा. ३)

इत्यत्रौजसो न मलत्वं शुक्लधात्वग्निस्तु परं दाह्याभावात् तत्रैव तिष्ठति ।

"पारम्पर्येण दावाग्नेस्तत्तत्प्राप्येन्धनं शिखा ।
वृद्धिक्षयौ यथा याति तद्वद् धातुपरम्परा ॥"

(अ. सं सू. १९)

इति वचनात् । "अन्ये पुनर्वर्णयन्ति । अभ्यवहृतमात्रस्याहारस्य कण्ठ-नाडीप्रलुठितस्य महानिम्नमवतीर्णस्य(यो)य एवांशः कायाग्निनावलीढः पाकमुपनीयते तस्य तस्यैव प्रसादाख्यो रसलेशोऽभिनिवृत्तिसमनन्तरमेव समं समस्तधातुषु संवृतासंवृतस्रोतस्सु परिस्रुतो विवृतमुखे (ष्वा) सन्नेषु च भूयान् प्रथमतरं चान्वेनि पर्यायेणेतरेष्विति । एवमन्नरस एव साक्षात् सर्वधातून् केनचिदेव कालभेदेन पुष्णाति । न पुनर्धातवो धात्वन्तरतां स्वरूपोपमर्देन" (अ. सं. शा. ६) इति ॥

अत्र अन्नरसस्य शुक्लधात्वग्निसमये रसात्मकमोजो भवति ।

"दशमूलसिरा हृत्स्थास्ताः सर्वाः सर्वतो वपुः ।
रसात्मकं वहन्त्योजस्तन्निबद्धं हि चेष्टितम् ॥"

(अ. हृ. शा. ३. १८)

इति वचनात् तदोजसः शुक्लमलत्वमुच्यते । अन्यच्च—

"रसाद् रक्तं ततो मांसं मांसान्मेदोऽस्थि मेदसः ।
अस्थ्नो मज्जा ततः शुक्लं शुक्लाद् गर्भः प्रजायते ॥"

(अ. हृ. शा. ३. ६२)

इति न्यायेन गर्भाशयपतितस्य निर्मलस्याप्यार्तवेनैकलोळीभूतस्य पित्त-पक्वाशयान्तरे ऊष्मणा पच्यमानस्य शुक्लस्य सारो गर्भः । तत्सहकारिणः पुनरोजसो मलत्वमुच्यते । उक्तं च

"यत्सारमादौ गर्भस्य यच्च गर्भरसा (दि ? द्र) सः ।
संवर्तमानं हृदयं समाविशति यत् पुरा ॥

यच्च गर्भरसः[1] स्नेहः प्राणो यत्र प्रतिष्ठितः ।
यस्यानाशान्न नाशोऽस्ति प्रीणिता येन देहिनः ॥
हृदयस्थमपि व्यापि तत्परं जीवितास्पदम् ।
मृदु सोमात्मकं शुद्धं रक्तमीषत्सपीतकम् ॥
यन्नाशे नियतं नाशो यस्मिंस्तिष्ठति तिष्ठति ।
निष्पद्यन्ते यतो भावा विविधा देहसंश्रयाः" ॥

इत्यादि ।

"ओजस्तेजस्तु धातूनां शुक्लान्तानां परं स्मृतम् ।"
इति धातुवहनक्रमजातस्य शुक्लस्य मलत्वमङ्गीकुर्वन्ति । तस्मात् पक्षद्वयमप्याचार्यमतमेव । अपरे पुनर्वर्णयन्ति—"द्विविधा वातादयः प्राकृता वैकृताश्च । तत्र प्राकृताः सप्तविधायाः प्रकृतेर्हेतुभूताः शरीरैकजन्मानः । ते शरीरधारणाद् धातुसंज्ञाः दोषाख्यानां वैकृतानां बीजभूताः मुमूर्षोः स्वरूपाच्चलन्ति ।" (अ. सं. शा. ८) ॥

"वैकृतास्तु गर्भादभिनिस्सृतस्याहाररसस्य मलाः संभवन्ति । प्राकृतेष्ववरोहन्ति । तद्वदोजोऽपि परं हृदयस्थमष्टबिन्दुप्रमाणमाधारः प्रासृतिकस्य रसात्मकस्यौजसः क्षयवृद्धिभाजः ।" (अ. सं शा. ८) इति । तद्वदितं प्राकृतवत् । इति विधानम् ॥२१॥

अनुमतम् २२

अपास्यानुमतं पक्षानात्मपक्षव्यवस्थितिः ॥२२॥

यथा—

"यथा रसाञ्जगुः पाकान् षट् केचित् तदसांप्रतम् ।
यत्स्वादुर्व्रीहिरम्लत्वं नचाम्लमपि दाडिमम् ॥
याति तैलं च कटुतां कटुकापि न पिप्पली ।
यथारसत्वे पाकानां न स्यादेवं विपर्ययः ॥"

(अ. सं सू. २७)

---

[1] 'यच्छरीररसः' इति मुद्रितसंग्रहे ।

इत्यादिना परपक्षमपास्य प्रायः स्वादुः स्वादुलवणयोरम्लोऽम्लस्य कटु-रितरेषामिति प्रायःशब्देन क्वचित् व्यभिचारं दर्शयन्नात्मपक्षं स्थापितवानाचार्यः । रसान्तरं विपाक इति कल्पने स्वाद्वम्लकटुकानां रसान्तरत्वं तु मधुराम्लकटुकस्कन्धद्रव्यरसभेदाद् युज्यत एव । तस्माद् रसः स्वाद्वादिभिरसौ तुल्यफल इति । 'फले वातादिशमनकोपनाख्ये तुल्य' इति वचनाद् रसान्तरत्वमूरीकृतम् । तर्हि रसविपाककार्यं बलीयः। उक्तं च—

"रसं विपाकस्तौ वीर्यं प्रभावस्तान्व्यपोहति ।
बलसाम्ये रसादीनामिति नैसर्गिकं बलम् ।।"

(अ. सं. सू. १७)

इतीदृशा स्वभावशक्तिः । अन्यच्च पराशरः पठति—

"पाकास्त्रयो रसानामम्लोऽम्लं पच्यते कटुः कटुकम् ।
चात्वारोऽन्ये मधुरं सङ्कीर्णरसास्तु सङ्कीर्णम् ।।
कटुतिक्तकषायाणां कटुको येषां विपाक इ(ति) पक्षः ।
तेषां पित्तविघाते तिक्तकषायौ कथं भवतः ।।"

इति । "तत्र यन्मधुरं रसविपाकयोः शीतवीर्यं च द्रव्यं यच्चाम्लं तयोरुष्णवीर्यं च । यद्वा कटुकं तेषां यथास्वं रसेभ्यः प्रायो गुणान् दोषकोपशमनत्वं च विद्यात् । तद् यथा—क्षीरमदिरामरिचादीनाम् रसादिसङ्करेण त्वन्यथात्वम् । यथा मधु मधुरं, श्लेष्माणं शमयति कटुविपाकतया । सकषायत्वाद् रौक्ष्याच्च वातं जनयति शीतवीर्यत्वाच्च । अम्लं काञ्जिकं कफं जयति रूक्षोष्णत्वात् । कपित्थं तु रौक्ष्याद्, आमलकं पित्तं शीतवीर्यत्वात् स्वादुपाकतया च । कफं रौक्ष्याल्लाघवाच्च । शैत्यरौक्ष्यलाघवैस्तु न वातं जयति । लवणं सैन्धवं स्वादुपाकतया पित्तं जयति । लाघवात् कफम् । कटुका शुण्ठी स्नेहौष्ण्यस्वादुपाकैर्वातं क्षपयति पिप्पली च । तिक्तानि व्याघ्रीविशल्यार्कागुरूण्युष्णवीर्यत्वात् पित्तं जनयन्ति । कषायतिक्तं महत् पञ्चमूलं वातं जयति न पित्तमुष्णवीर्यत्वात् । कषायश्च कुलत्थोऽम्लपाकतया चेति । एतन्निदर्शनमात्रमुक्तम्" (अ. सं. सू. १७) । तेन

"किञ्चिद्रसेन कुरुते कर्म वीर्येण चापरम् ।
द्रव्यं गुणेन पाकेन प्रभावेनैव किञ्चन ॥"

(अ. सं. सू. १७)

इत्यनुमतम् ॥२२॥

व्याख्यानम् २३

व्याख्यानमात्मनोक्तानामात्मनैवार्थभाषणम् ॥२३॥

यथा—"पित्तविकाराः पुनरोषः प्लोषो दवो दवथुः" (अ. सं. सू. २०) इत्यादीनामाशुकारितया चिकित्साकारि । तेषां स्वरूपं व्याख्यातवानाचार्यः । तत्र सर्वाङ्गीणस्तीव्रः सन्तापो दाहः । स्वेदारतिमानोषः । प्रादेशिकः स्वेदरहितोऽन्यर्याचषेव दाहः प्लोषः । मुखोष्ठतालु (पाद) दाहो दवः । चक्षुरादीन्द्रियेषु दाहो दवथुः । "पाणिपादांस (देशे ? मूलेषु) विविधः सन्तापो विदाहः" (अ. सं. सू. २०) इत्यादि । इति व्याख्यानम् ॥२३॥

संशयः २४

निर्धारितानामर्थानामव्यवस्था तु संशयः ॥२४॥

यथा—

"साध्ययोरपि संयोगो बलिनोर्यात्यसाध्यताम् ।
विद्यादसाध्यमेवातः साध्यासाध्यसमागमम् ॥
नासाध्यः साध्यतां याति साध्यो याति त्वसाध्यताम् ।
पादापचाराद् दैवाच्च यान्त्यवस्थान्तरं गदाः ॥"
(अ. सं. सू. २)

चशब्दोऽत्र विकल्पे ।

"समुच्चयान्वाचययोस्तुल्ययोगे च कारणे ।
इतरेतरयोगेऽपि च यद्यर्थविकल्पयोः ॥"

इति संशयः ॥२४॥

अतीतापेक्षा २५

भवेदतीतापेक्षा सा भूयोऽप्युक्तव्यपेक्षिता ॥२५॥

यथा—'समः समाने स्थानस्थ' (अ. सं. शा. ६)
इत्यादे 'स्तैर्भवेद् विषम' (अ. सं सू. २) इत्यादिग्रन्थार्थमपेक्ष्य "समाने स्थानस्थ" इति वाक्येन समैर्दोषैः समाग्निः। "विमार्गग" इति वाक्येन वातोत्कर्षेण विषमोऽग्निः। पित्तोत्कर्षेण तीक्ष्णोऽग्निः। कफपीडिते मन्दोऽग्निर्भवेत्। इति हि तात्पर्यम्। अन्यथा व्यवहारव्याहतिरेव। एवमत्र समानानिलप्राधान्यस्य को हेतुरिति चेत्—

"सिराविभागे ये चोक्ता विषमाद्यास्त्रयोऽग्नयः।"

(अ. सं. नि. ८)

इत्यादिवचनादग्निः परं रक्षितव्यः। तस्य च 'समानोऽग्निसमीपस्थ' (अ.हृ.सू.२२. ८) इति वचनात् समानस्य प्राधान्यं कलितवानाचार्यः। अग्नीनां लक्षणम्—

"यः पचेत् सम्यगेवान्नं भुक्तं सम्यक्समस्त्वसौ।
विषमो सम्यगप्याशु सम्यक् चापि चिरात्पचेत्॥
तीक्ष्णो वह्निः पचेच्छीघ्रमसम्यगपि भोजनम्।
मन्दस्तु सम्यगप्यन्नमुपयुक्तं चिरात् पचेत्॥
कृत्वास्यशोषाटोपान्त्रकूजनाध्मानगौरवम्।"

(अ.हृ. शा. ३. ७४)

इत्यतीतापेक्षा ॥२४॥

अनागतापेक्षा २६

भवेदनागतापेक्षा भावितार्थप्रदर्शनम् ॥२६॥

यथा—'मूत्रजेषु तु पाने च' (अ. सं. सू. ६) इत्यादिग्रन्थस्य मूत्रनिरोधजेषु व्याधिषु पाने प्राग्भक्तं भक्तात् पूर्वं यामद्वयजरणलक्षणया मात्रया घृतं शस्यते। एतन्मात्राद्वयम्। अनागतमवाप्पीडनादवपीडकं नाम। स तीक्ष्णाग्निश्चेत् तदुचिता कापि मात्रा कल्प्या। वातहरत्वेऽप्यल्पमूत्रत्वात् तैलं न शस्तम्। इत्यनागतापेक्षा ॥२६॥

स्वसंज्ञा २७

स्वसंज्ञा सा तु या संज्ञा स्वतन्त्रेष्वेव दृश्यते ॥२७॥

यथा—'शाखारक्तादयस्त्वक् च' (अ. हृ. सू. १२. ४४) इति संज्ञिता । यद्येवं 'स्नेहक्लिन्नाः कोष्ठगा' (अ. हृ. सू. १७. २९) इत्यादिग्रन्थे शाखाः किंव्यपदेशाः तत्र शाखाः पाणिपादाः । सिराविभागे तु तत्रैकैकत्र शाखायां शतम्' (अ. सं. सू. ६) इत्युक्तत्वात् । इति स्वसंज्ञा ॥२७॥

ऊह्यम् २८

ऊह्यमुक्तानुसारेण विशिष्टार्थविवेकिता ॥२८॥

यथा—'अकाले बहु वाल्पं वा भुक्तम्' (अ. हृ. सू. ८. ३४) इत्यादौ अकाल इत्यतीतोऽप्राप्तः कालश्च । बह्विति यथोक्तमितेरधिकता । अल्पमिति तदल्पता । तेन अतीतकाले बहुभुक्तं वा अप्राप्तकाले बहु वाल्पं वा कु (?) भुक्तं विषमाशनं विद्यात् । अतीते तु—

"तत्र योज्यं लघुस्निग्धमुष्णमल्पं च भोजनम् ।

(अ. हृ. सू. ४. १२)

इति क्षुन्निग्रहस्य चिकित्सितत्वेनोक्तत्वात् अल्पस्य न विषमाशनत्वम् । 'अतिमात्रं पुनः सर्वानाशु' (अ. हृ. सू. ८. ४) इत्यस्य उदरपूर्तिरतिसौहित्यं चोक्तम् । मात्रालक्षणं तु पिण्डपरिमाणतस्तु 'अन्नेन कुक्षेर्द्वावंशौ' (अ. हृ. सू. ८. ४६) इत्यादि । प्रतिद्रव्यापेक्षया "गुरूणामर्धसौहित्य" मित्यादि । "अकाले बह्वि" त्यादि कालापेक्षा । मात्रास्वरूपं तु "कुक्षेरप्रतिपीडनमाहारेण हृदयस्यासंरोधः । पार्श्वयोरविपाटनमनतिगौरवमुदरस्य । प्रीणनमिन्द्रियाणाम् । क्षुत्पिपासोपरतिःस्थानासनशयनगमनोच्छ्वासप्रश्वासहास्यसंकथासु सुखानुवृत्तिः । सायं प्रातश्च सुखेन परिणमनम् । बलवर्णोपचयकरत्वं च" (अ. सं. सू. ११) इत्याचार्येणैव दर्शितम् । इत्यस्य नाधिकत्वं बहु । अत्यधिकमतिमात्रमित्यर्थः । अन्ये व्याख्याकाराः अकाले भुक्तं बहु वाल्पं वा भुक्तं विषमाशनं विद्यादिति वर्णयन्ति ।

---

* 'तासामेकैकस्मिन् सक्थ्नि शतम्' इति मुद्रितसंग्रहे दृश्यते ।

"हीनमिथ्यातिमात्रमशनं मरुन्निचयकोपनम् ।"

इत्युक्तत्वात् । इत्यूह्यम् ।।२८।।

समुच्चयः २९

समुच्चयस्तु योग्यत्वमुक्तानां तु प्रदर्शयेत् ।।२९।।

यथा—'पेयां विलेपीम्' (अ. हृ. सू. २८. २९) इत्यादौ यूषरसयोस्तु सान्नत्वं च शब्दाद् योग्यतया समुच्चीयते । अत्र प्रधानशुद्धस्य तृतीयदिनात् परं यूषरसाभ्यां त्रिदिनमपोह्य सप्तमेऽहनि प्रकृतिभोजनमित्यर्थः । एवमन्ययोरपि वेद्यम् । "अकृतं कृतमि" ति यूषरसयोः प्रत्येकमिति केषाञ्चिन्मतम् । इति समुच्चयः ।।२९।।

निदर्शनम् ३०

निदर्शनं त्वसम्भाव्योऽप्यर्थो येन समर्थ्यते ।।३०।।

यथा—"शुक्रार्तवगर्भाशयकालेषु मातुश्चाहारविहारैरेकोऽनेको वा दोषो भवत्याधिक्येन । तेनामरणाद् विषवल्यामिवोत्पद्यमानस्य क्रिमेर्विषेण सविषक्रिमेरिव वृश्चिकादेराशीविषस्येव वा स्वविषेण प्रकृतिर्जायते" (अ. सं. शा. ८)इत्यत्र दृष्टान्तत्रयं किं प्रयोजनमिति चेत् । उच्यते—

"अल्पमध्यातिमात्रत्वाद् दोषाणां च विषस्य च ।
भवेत् प्रकृतिरित्युक्तं दृष्टान्तत्रितयं क्रमात् ।।"

अत्र प्रकृत्युत्पादनं प्रत्येवमुक्तं प्रकृतिविघाते तु रिष्टप्रकरणे—

"पुष्पं फलस्य धूमोऽग्नेर्वर्षस्य जलदोदयः ।"

(अ. हृ. शा. ५.१)

इत्यत्र दृष्टान्तत्रयेण—

"चिरात् सद्योऽल्पकालेन सूचयन्त्यायुषः क्षयम् ।
रिष्टानीति हि निर्दिष्टं रिष्टाभासो न चेत्तदा ।।"

"प्रकृतिर्नाम शरीरस्वरूपं सा च जन्ममरणान्तरालवर्तिनी स्वकारणोद्रेकजनिता निर्विकारा कापि दोषस्थितिः" । इति निदर्शनम् ।।३०।।

निर्वचनम् ३१

तत् स्यान्निर्वचनं येन वाक्यस्यार्थः प्रदर्श्यते

यथा—शरीरारोहणादचिन्त्यप्रभावतयास्मिन्नूहासम्भवाच्च निरूह इत्यादि । अनेन वस्तीनां प्रमादत्वं सूचितमेव । यथा—

"यत्तत्रौषधवीर्यं तु तद्व्यानेन वायुना ।
पर्याप्तमचिरादेव समानः प्रतिपद्यते ।।
समानादुत्तरश्चैवं व्यानाद्याः पवनाः क्रमात् ।
ते तृप्ताः प्रकृतिं याताः शरीरानुग्रहे स्थिताः ।।
प्रशाम्य पित्तश्लेष्माणौ यथास्थानं निवेश्य च ।
सन्तर्पयन्ति परितः स्वान् स्वान् भूतगुणांस्तनौ ।।
व्यानस्तिर्यगपानोऽधः प्राणश्चोर्ध्वं प्रकर्षति ।
यथास्वमेव नाडीभिर्हरिणीभिरिवोदकम् ।।
एवं वातः सिराभिश्च वपुर्वस्तिः सुयोजितः ।
व्याप्नुवन् प्रसभं हन्ति सुकृच्छ्रानपि यक्ष्मणः ।।"

इत्यारोहणक्रमः । अन्नमनुवसन्नपि न दुष्यतीत्यनुवासनम् । अपिश्च-ब्वादच्छस्नेहस्य सान्नत्वे दोषः सम्भवति । तस्मान्निरन्न एवाच्छः । तथाहि—

"सम्यग्घोनातियोगाश्च तस्य स्युः स्नेहपीतवत् ।"

(अ. हृ. सू. १९. ५३)

इत्युक्तत्वात् स्नेहपानसमानत्वमनुवासनस्य । त्र्यहमच्छमनुवासरं दीयत इति पानयोर्विशेषः इति निर्वचनम् ।।३१।।

नियोगः ३२

नियोगोऽताद्विधानां तु तद्विधत्वनियोजना ।।३२।।

यथा—क्षीरगुणकथने "स्निग्धं गुरुशीतल" मिति गुर्वादिपठिता गुणाः । स्वादुपाकादीनां तु साहचर्योपचाराद् गुणत्वमङ्गीकृतम् । आचार्येणापि 'गुर्वादयो गुणा द्रव्ये पृथिव्यादौ रसाश्रय' (अ. हृ. सू. ९. ४)

इत्यादिना रसस्य गुणत्वं व्यपदिष्टम् । व्यपदिष्टं न तत्त्वतः । निर्गुणा गुणा इति न्यायात् ।

"इन्द्रियार्थो व्यवायी च विकाषी चापरे गुणाः ।"

(अ. सं. सू. १)

इति रसस्य गुणत्वमुपचरितं तेनाहाररसपरिणामस्य विपाकस्यापि गुणत्वमुक्तं किं पुनर्गुणोत्कर्षस्य वीर्यस्य इति पूर्वाचार्यस्य नियोगः । अन्यच्च

"बृंहणं लङ्घनञ्चैव शमनं शोधनं तथा ।
स्तम्भनं स्वेदनं चापि क्लेदनं शोषणं पुनः ।
रोपणं लेखनं चैव प्रसादनविलालने ।
श्लथनं द्रढनं चापि धारणव्यापनं पुनः ॥
विवृतिः संवृतिश्चैव तथा क्षालनलेपने ।
एतानि भौमाप्याग्नेयवायव्यान्यपि विंशतिः ॥
अन्यानि चैवंरूपाणि गुर्वादिगुणशक्तयः ।"

अतो दोषकोपशमनत्वमपि गुणकार्यमेव । गुणो नाम द्रव्यस्य कापि वैशिष्टिः । आचार्येण तु 'प्रत्यकं तच्चतुर्गुणम्' (अ. सं. सू. २) इति भिषगादिवैशिष्टिर्दर्शिता । गुरुमन्देत्यादौ अष्टविधं वीर्यं च । गुर्वादिसूचनार्थं हि तत्तत्पदच्छेदकल्पना कृता । इति नियोगः ॥३२॥

विकल्पनम् ३३

विकल्पनमनिर्धार्यमर्थं प्रति विवेचनम् ॥३३॥

यथा—

"बृंहणं लङ्घनं नालमतिमेदोऽग्निवातजित् ।"

(अ. हृ. सू. १४. ३२)

इति स्थूलस्य दुश्चिकित्स्यत्वमुक्तम् । कथमिति चेत्—

"स्रोतःसु मेदोरुद्धेषु वायुः कोष्ठे विशेषतः ।
चरन् प्रज्वलयत्यग्निं क्षुत्तृषौ भवतोऽधिकम् ॥
स्थूलं, कोटरवद्वृद्धौ दहतोऽग्न्यनिलौ च तौ ।"

(अ. सं. सू. २४)

इत्युक्तत्वाद् । मेदोहराण्यग्न्यनिलकराणि । मेदस्कराण्यग्न्यनिलहराणि । ततो विरुद्धोपक्रमत्वात् । नहि । 'नहि स्थूलस्य भेषजम्' (अ. सं. सू. २४) इति भेषजासिद्धिरुक्ता । 'विळङ्गं नागरम्' (अ. स. सू. २४) इत्याद्यपार्थमेव स्यात् । इति विकल्पनम् ॥३३॥

प्रत्युत्सारः ३४

प्रत्युत्सारः पदाद्यन्त्यमध्यलोपो यथायथम् ॥३४॥

यथा—"वेगान्न धारये" दित्यादौ अधःशब्द आदिपदलोपः । अनन्तरमेवा "धोवातस्ये" त्युक्तत्वात् । "द्रवद्रव्यविज्ञानीय" मित्यत्र स्वरूपशब्दो मध्यपदलोपः । परत्रा "न्नस्वरूपविज्ञानीय" मित्युक्तत्वाद् । "दिनचर्या" मित्यत्र दिनेषु पुरुषस्य चर्या न त्वध्यायस्य । तेन चर्याविज्ञानीयामिति वक्तव्ये विज्ञानीयशब्दोऽन्ते लुप्तः । अन्यत्र विज्ञानीयशब्दप्रयोगात् । एव "मृतुचर्या" वयः । 'अन्नं कालेऽभ्यवहृतम्' (अ. हृ. शा. ३. ५५) इत्यत्र आदिमध्यान्तशब्दा लुप्ताः । इति प्रत्युत्सारः ॥३४॥

उद्धारः ३५

उद्धारः प्रथमं प्रोक्तमर्थमुद्धृत्य योजना ॥३५॥

यथा—'निद्रायत्तं सुखं दुःखं(अ. सं. सू. ९) इत्यादिना प्रोक्तमर्थं "मकालेऽतिप्रसङ्गाच्चे" त्यादिना "सुखायुषो" प्रत्याहृत्य कथितम् । अतिप्रसङ्गादिति न कालपरः निद्राधिक्यपर एव । अन्यथा अकालप्रसङ्गः स्यात् निद्रायाः । "अकाल" इति मिथ्यायोगः । "अतिप्रसङ्गा--दि"ति अतियोगः । "नचे"ति हीनयोगः । एवं त्रिविधा निद्रा "सुखायुषो पराकुर्यात्" अपरा सम्यङ्गनिषेविता निद्रा दुःखमरणे प्रत्याहृत्य पराकुर्यादादिति चशब्दागता । निद्रा नाम तामसी कापि वृत्तिः ।

"लोकादिसर्गप्रभवा तमोमूला तमोमयी ।
बाहुल्यात् तमसो रात्रौ निद्रा प्रायेण जायते ॥"

(अ. सं. सू. ९)

इति वचनात् ।

"अपच्यमानो बाहुल्यात् स्रोतांस्यावृणुते कफः ।
ततः स्रोतःसु रुद्धेषु जायते गात्रगौरवम् ॥
गुरुगात्रस्य चालस्यमालस्यादतिनिद्रता ।"

(अ॰ सं॰ सू॰ ९)

इति निद्राधिक्यम् ।

"श्लेष्मावृतेषु स्रोतःसु श्रमादुपरतेषु[1] च ।
इन्द्रियेषु स्वकर्मभ्यो निद्रा विशति देहिनम् ॥"

(अ॰ सं॰ सू॰ ९)

इति तदावेशविवशस्य शयनं स्वप्नः ।

"सर्वेन्द्रियव्युपरतौ मनोऽनुपरतं यदा ।
विषयेभ्यस्तदा स्वप्नं नानारूपं प्रपश्यति ॥"

(अ॰ सं॰ सू॰ ९)

स्वप्नसमये दर्शनविशेषः अस्तु नाम किन्तु 'निद्रानाशादङ्गमर्द' (अ॰ सं॰ सू॰ ९) इत्यादिश्च 'निद्राया मोहमूर्ध्वाक्षि' (अ॰ सं॰ सू॰ ९) इत्यादिश्च पुनरुक्त इव । मैवम् । अतिभाष्यादिना निद्रानाशादङ्गमर्दादयः । निद्रायां वेगधारणान्मोहादयः ।

"दिवा स्वप्नप्रसङ्गे तु मुहूर्तं स्वपनं मतम् ।
ततोऽधिकं यदि भवेत् कोपाय कफपित्तयोः ॥
अकालशयनान्मोहज्वरस्तैमित्यपीनसाः ।
शिरोरुक्कास*हृल्लासस्रोतोरोधाग्निमन्दताः ॥
तत्रोपवासवमनस्वेदनावनमौषधम् ।
योजयेदतिनिद्रायां तीक्ष्णं प्रच्छर्दनाञ्जनम् ॥
नावनं लङ्घनं चिन्तां व्यवायं शोकभीक्रुधः ।
एभिरेव च निद्राया नाशः श्लेष्मातिसंक्षयात् ॥

---

1 'श्रमाद्' इति पाठभेदः * 'शोफ' इति,

निद्रानाशादङ्ग* शिरोगौरवालस्यजृम्भिकाः ।
जाड्यं ग्लानिभ्रमापक्तितन्द्रा रोगाश्च वातजाः ।।
यथाकालमतो निद्रां रात्रौ सेवेत सात्म्यतः ।"

(अ. हृ. सू. ७. ६—६४)

इत्यनेन हीनमिथ्यातियोगनिद्राणां रोगांश्चिकित्सां चोक्तवान् ।

"कालस्वभावाऽऽमयचित्तदेह-
स्वेदैः कफागन्तुतमोभवा च ।
निद्रा बिभर्ति प्रथमा शरीरं
[1] पाप्मान्तगा व्याधिनिमित्तमन्या ।।"

(अ. सं. सू. ९)

इति विशेषविभागश्च प्रोक्तः । इत्युद्धारः ।।३५।।

सम्भवः ३६

सम्भवो भावयेद् युक्त्या तन्त्रार्थमनुरूपया ।। ३६ ।।

यथा—"नित्यं हिताहारविहारे" त्यादिना निजरोगानुत्पत्तिरुक्ता । "अर्थेष्वलभ्येष्वि" त्यादिनागन्तुरोगानुत्पत्तिः "कालोऽनुकूल" इत्यादिना कर्मरोगानुत्पत्तिः । इति बोद्धव्यम् । 'यथा तावत् तेऽर्थप्रत्यायनपरा' (अ. सं सू. १) इत्यादि महर्षीणां वचनानादरत्वमुद्घोषितवता लाघविकेनार्चेण श्रीवाहटेन पद्यत्रयमिदं न प्रसज्येत । इति सम्भवः ।।३६।।

इत्यधिकरणादिसम्भवान्तं षट्त्रिंशत्संङ्ख्यास्तन्त्रयुक्तयः । एता एवमेवं तत्र तत्र तन्त्रप्रदेशे सर्वत्र सावधानेनोपयोज्याः ।।

इति वैद्यनाथापरनामधेयेन नीलमेघभिषजा
विरचितस्तन्त्रयुक्तिविचारः समाप्तः ।।

★

शुभं भूयात् ।

---

* 'सर्वशिरोगौरवजृम्भिकाः' इति, [1] 'पापात्मिका' इति च पाठभेदः

APPENDIX I

अष्टाङ्गसंग्रहः

[उत्तरस्थाने अध्यायः ५०–पृष्ठसंख्या 471-474]

तत्राधिकरणं योगो हेत्वर्थोऽर्थः पदस्य च ।
प्रदेशोद्देशनिर्देशवाक्यशेषाः प्रयोजनम् ॥

उपदेशापदेशातिदेशार्थापत्तिनिर्णयाः ।
प्रसङ्गैकान्तनैकान्ताः सापवर्गो विपर्ययः ॥

पूर्वपक्षविधानानुमतव्याख्यानसंशयाः ।
अतीतानागतापेक्षा स्वसंज्ञोह्यसमुच्चयाः ॥

निदर्शनं निर्वचनं नियोगोऽथ विकल्पनम् ।
प्रत्युत्सारस्तथोद्धारः सम्भवस्तन्त्रयुक्तयः ॥

इन्दुः—तत्रेत्यादिना युक्तयः उच्यन्ते । वाक्यार्थानां योजनं युक्तिः याभिर्योजनाभिर्विना तन्त्रमसंबद्धं भवति । का युक्तयः । तत्र तेष्वधिकरणं नाम अधिकरणं प्रस्तावः सामान्येनोक्तमप्यर्थजातं यद्बलाद्विशेऽवस्थाप्यते तदधिकरणम् । यथा सप्ताहादौषधं केचिदाहुरन्ये दशाहत इति वाक्यार्थः सामान्येन प्रवृत्तोऽधिकरणवशाज्ज्वराख्ये विशेषेऽवस्थाप्यते ॥ १ ॥ योगो नाम योगः सम्बन्धः स च पदार्थयोर्वाक्यार्थयोर्वा । तत्र पदार्थयोः साध्यसाधनभावेन । यथा रागादिरोगा इत्यादौ समूला इत्यस्यापास्ता इत्यनेन वाक्यार्थयोर्यथा जीर्णाजीर्णविशङ्कायां पुनरुष्णोदकं पिबेदित्यस्य तेनोद्गारविशुद्धिः स्यात्ततश्च लघुता रुचिरित्यनेन ॥ २ ॥ हेत्वर्थो नाम यदेकत्रोच्यमानमन्यत्रापि तथैवोपयुज्यते । यथा तत्रैकैकत्र शाखायामित्याद्यवेध्योक्त्या शेषा वेध्या इति गम्यते ॥ ३ ॥ पदार्थो नाम पदेनार्थोऽवगम्यते । यथा गुर्वादयो गुणशब्दादवगम्यन्ते ॥ ४ ॥ प्रदेशो नाम यत्रैकदेशस्योच्यमानस्यार्थस्य

प्रसादादनुच्यमानोपि तच्छेष आपद्यते सः प्रदेशः। यथा कुकूलादिपाक-क्रमेण लाघवातिशयोऽपूपानामुच्यमानानां प्रसादादनुच्यमानान्यपि कृतान्नानि तथावगम्यन्ते ॥ ५ ॥ उद्देशो नाम यत्रार्थानां शब्दमात्रेणैव कीर्तनमुद्देशः। ह्रस्वदीर्घा इत्यादयोऽष्टौ नेत्रदोषा इति शब्दमात्रेणाष्टौ कीर्तिताः ॥ ६ ॥ निर्देशोनाम यच्छब्दमात्रेण निर्दिष्टानां स्वरूपविशेष-प्रदर्शनाय पुनः कीर्तनं निर्देशः। यथा वस्तिव्यापदि द्रुतोत्क्षिप्त इत्यादिकमु-द्दिश्य तेषु दोषं प्रदर्शयितुमनुच्छ्वासस्य तु बद्ध इत्युच्यते ॥ ७ ॥ वाक्यशेषो-नाम यस्मिन् वाक्ये एकदेशः शिष्यते व्याख्याकालेत्वनुच्यमानोप्या-पतति स वाक्यशेषः। यथा रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता इत्यत्र उच्यत इति वाक्यशेषः ॥ ८ ॥ प्रयोजनं नाम यत् सम्पादयितुं क्रिया ह्यारभ्यते तत्प्रयोजनम्। यथा सदोषेषु दोषशेषपाचनमग्निसन्धु-क्षणं च सम्पादयितुमौषधपानमारभ्यते ॥ ९ ॥ उपदेशो नाम शुद्धस्याप्त-वचनस्य कीर्तनमुपदेशः। यथा गर्भस्तु मातुः पृष्ठाभिमुखो ललाटे कृताञ्जलिः संकुचिताङ्ग इत्येवमादि ॥ १० ॥ अपदेशो नाम प्रतिज्ञातस्य साधनहेतुरपदेशः। यथा अहितायोत्तरोत्तरं दुष्टा वातादय इत्यस्यां प्रतिज्ञायां दुष्परिहरत्वादिति हेतुः ॥ ११ ॥ अतिदेशो नाम अन्य-सम्बन्धिनां धर्माणामन्यत्रावस्थापनमतिदेशः। यथा पालक्यासम्बन्धिनां धर्माणां चुल्लाववस्थापनम् ॥ १२ ॥ अर्थापत्तिर्नाम यदेकस्मिन्नर्थ उच्यमाने अनुक्तस्याप्यर्थस्य बलादागमनं सार्थापत्तिः। यथा पक्वे जले जीर्णेप्यामं न पेयमित्युच्यमाने आभोजनादित्यनुच्यमानस्यापि साम-र्थ्यादागमनम् ॥ १३ ॥ निर्णयो नाम उद्दिष्टानामर्थानामनुद्दिष्टेन निरा-काङ्क्षत्वापादनं निर्णयः। यथा वर्त्मरोगविज्ञानीयोक्तानां रोगाणां वर्त्म-रोगप्रतिषेधनिराकाङ्क्षत्वापादनम् ॥ १४ ॥ प्रसङ्गो नाम यदप्राकरणिक-स्यापि वस्तुनः किञ्चित् सम्बन्धेन यत् कीर्तनं स हि प्रसङ्गः। यथा वमनप्रस्तावे धूमान्तैः प्रायः सर्वैरित्यादेरप्राकरणिकस्य कीर्तनम् ॥ १५ ॥ एकान्तो नाम यत् पक्षान्तरव्यावर्तकं तदेकान्तः। यथा दोषहेतु-जत्वोक्तेर्निजत्वं न कदाचिदपि बाह्यहेतुजं व्याप्नोति ॥ १६ ॥ नैकान्तो नाम यदुच्यमानमप्यवश्यम्भावित्वेनानियतं स नैकान्तः। यथा ज्वरस्तु जातः षड्रात्रादश्विनीषु निवर्तत इत्येतदुक्तमप्यवश्यम्भावित्वेनानियतम् ॥ १७ ॥ अपवर्गो नाम सामान्योक्त्यनुप्रविष्टस्य विशेषेणाकर्षणं सोपवर्गः।

यथा मधुरं श्लेष्मळमित्युक्तावनुप्रविष्टेषु जीर्णशाल्यादिषु शब्देनाकर्षणम् ॥ १८ ॥ विपर्ययो नाम उक्तस्यान्यथाभावो विपर्ययः। यथा निदानोक्तानामनुपशयो भवति तद्विपरीतानां चोपशयः ॥ १९ ॥ पूर्वपक्षो नाम परप्रतिज्ञातानुपपत्तिप्रदर्शनपरो वाक्यसमुदायः पूर्वपक्षः यथा षड्सवादिनं प्रत्यनेकरसप्रतिपादकानि वाक्यानि ॥ २० ॥ विधानं नाम तन्त्रस्य कर्त्रा विशिष्टा या पदादिरचना कृता तद्विधानम्। यथा सर्वविरोध परिज्ञानाद्व्यवहारोच्छित्तिर्माभूदित्यभिप्रायेणोक्तं न च तद्विज्ञानमेकान्त भद्रकमिति ॥ २१ ॥ अनुमतं नाम परपक्षस्य भिन्नस्याप्यङ्गीकरणमनुमतम्। यथा वस्तिविधाने कल्पनाया मतेषु दोषौषधादिबलतः सर्वमेतत् प्रमाणयेदित्यङ्गीकरणम् ॥ २२ ॥ व्याख्यानं नाम सङ्क्षेपेणोक्तस्यार्थस्य विस्तरेणाख्यानं व्याख्यानम्। यथा सर्वरोगनिदाने तस्योपलब्धिर्निदानादिभिरिति सङ्क्षेपेणोक्तस्य तदेत्यादिना विस्तरेणाख्यानम्। अथवा स्फुटैः शब्दैरनभिहितं गुरुपारम्पर्यक्रमागतम् ॥ २३ ॥ संशयो नाम विरुद्धानां पक्षाणामनिश्चयः संशयः। यथा विषवेगसंभवपक्षेषु ॥ २४ ॥ अतीतापेक्षा नाम यत्रातीतं पदमपेक्ष्य सम्बन्धार्थता भवति सातीतापेक्षा। यथा स्वेद्यादयः स्नेह्या इत्युक्ते नत्वतिमन्दाग्निरित्यादेः स्नेह्या इत्यपेक्षते। यथा च ज्वरे लङ्घनं कुर्वीतेति सूत्रोक्तं लङ्घनमपेक्षते ॥ २५ ॥ अनागतापेक्षा नाम यत्रानागतेनार्थेन सम्बन्धिता भवति सानागतापेक्षा। यथा ततो नावनगण्डूषेत्यादिना दिनचर्यायां नस्यादिविधयोऽपेक्ष्यन्ते ॥ २६ ॥ स्वसंज्ञा नाम या स्वतन्त्रे एवमन्यस्मिञ्छास्त्रे न श्रूयते सा स्वसंज्ञा। यथा आपानोजेन्ताक इत्येवमादि ॥ २७ ॥ ऊह्यं नाम यत् भिषजा स्वप्रज्ञया शब्देनानुक्तमपि व्यवस्थाप्यते तदूह्यम्। यथा द्रव्यं जह्यादयौगिकमिति यन्न यौगिकं तच्छब्देन नोक्तमपि प्रज्ञया व्यवस्थाप्यते ॥ २८ ॥ समुच्चयो नाम एकस्मिन् विहिते तदविरोधेन तत्रैव द्वितीयस्य विधानं समुच्चयः। यथा वातस्योपक्रमः स्नेहः स्वेद इत्यादि ॥ २९ ॥ निदर्शनं नाम साध्यस्यैकदेशो दृष्टान्तो निदर्शनम्। यथा आमदोषेषु त्रिविधेषु लङ्घनपाचनशोधनानि दृष्टान्तः। (एवमन्यानपि व्याधीन् स्वनिदानविपर्ययात् चिकित्सेदित्यादेः) ॥ ३० ॥ निर्वचनं नाम संज्ञयोक्तस्य तदर्थेन योजनं निर्वचनम्। यथा सूचीभिरिव गात्राणि भिद्यतीति विषूचिका ॥ ३१ ॥ नियोगो नाम क्रियाणां व्यापाराणां नियोगः। यथा भवता स्वेदमूर्च्छा-

परीतेनापि नैषा पिण्डिका विमोक्तव्येति ॥ ३२ ॥ विकल्पो नाम क्रमेण यौगपद्येन वा सम्भविनां पक्षाणां कीर्तनम्। यथा कुर्वीत लङ्घनम् प्राग्रूपेषु ज्वरादौ वा ॥ ३३ ॥ प्रत्युत्सारो नाम यत्रोपपत्ति दर्शयन्तः परस्परमतानि निवारयन्ति। यथा गर्भिणी अष्टमे मासि क्षीरयवागूं सर्पिष्मतीं पिबेत् नेति खण्डकाप्यः गर्भस्य पैङ्गळ्या बाधभयात्। अस्तु पैङ्गळ्या बाधस्तथाप्येवं कुर्वती नीरुजं बलवर्णाद्युपेतमपत्यं जनयतीति भगवानात्रेयः ॥ ३४ ॥ उद्धारो नाम यच्छास्त्रे चोद्यस्य समाधानम्। यथा चित्रकर्मगुणकृत् गुरुणोक्तो वस्तिरित्यादि यावत् सर्वतः कथमपोहति दोषानिति चोद्यस्य स्तिमितमारुतवश्यमेतदित्यादि समाधानम्। ॥ ३५ ॥ सम्भवो नाम किमप्यन्यत्रादर्शनाद्येन नियमेन स्थाप्यते स सम्भवः। यथा सर्वरोगेषु हेतुलिङ्गौषधादीनां सामान्येनोक्तौ वातादिविशेषणावस्थापनं सम्भवप्रसादाल्लभ्यम् ॥ ३६ ॥ एवं तन्त्रयुक्तयः। यद्यपि भट्टारकप्रस्थानेन च परिप्रश्नव्याकरणव्युत्क्रान्ताभिधानहेत्वाख्याश्चतस्रोवशिष्यन्ते तथापि ता आचार्येण तन्त्रेणानिबद्धा इत्यत्र नोच्यन्ते। अथवा तन्त्रयुक्तित्वमेव तासां नाङ्गीक्रियते। तत्र चाग्न्यतियोगोक्तौ वातादिविशेषेणावस्थापनं सम्भवप्रसादाल्लभ्यमेवमाद्युक्तम् ॥

सरसः सुप्तपद्मस्य रविदीधितयो यथा।
यथा गृहस्य दीपाभास्तथा तन्त्रस्ययुक्तयः॥
अधीयानोपि तन्त्राणि तन्त्रयुक्त्यविचक्षणः।
नाधिगच्छति तन्त्रार्थमर्थं भाग्यक्षये यथा ॥

सरस इत्यादि सुबोधम्। तन्त्रयुक्त्यविचक्षणः एतासु षट्त्रिंशत्तन्त्रयुक्तिष्वसमर्थस्तन्त्रार्थं नाधिगच्छति न प्राप्नोति यथा भाग्यक्षये धनम् ॥

वाक्यार्थयोजनादेता युक्तयस्त्विष्टसिद्धिदाः।
असद्वादिप्रयुक्तानां वाक्यानां प्रतिषेधकाः॥
लीनव्यत्यासलेशोक्तिगदितानां प्रकाशकाः।
वाक्यन्यायोदधेः सारं गृहीत्वैवं व्यवस्थिताः॥

एता युक्तयो वाक्यार्थस्य योजनाद्धेतोः स्वेष्टसिद्धिं ददति। यानि चासद्वादिनाऽर्थसम्बन्धप्रदर्शनपराणि वाक्यानि तेषां प्रतिषेधकाः। लीनगदितानां व्यत्यासगदितानां लेशगदितानामुक्तिगदितानां च प्रकाशकाः। लीनं तद्यत् स्फुटं वक्तुं न पार्यते। व्यत्यासः परस्परविवर्तनम्। लेशोंऽशेन स्पर्शः। उक्तिर्वचनभङ्गिः। एताश्च युक्तयो वाक्यन्यायोदधेरसंख्यप्रकारसम्भविनो गेयस्येव जातयः सारं गृहीत्वा एवं व्यवस्थिताः। पदार्थयोजनास्तु व्युत्पन्नानां प्रसिद्धा एवेत्यत आचार्येण नोक्ताः।

APPENDIX II

कौटलीयं अर्थशास्त्रम्

[तन्त्रयुक्तिः – पञ्चदशमधिकरणम्]

मनुष्याणां वृत्तिरर्थः, मनुष्यवती भूमिरित्यर्थः, तस्याः पृथिव्या लाभपालनोपायः शास्त्रमर्थशास्त्रमिति।

तद् द्वात्रिंशद्युक्तियुक्तम्—अधिकरणं, विधानं, योगः, पदार्थः, हेत्वर्थः, उद्देशः, निर्देशः, उपदेशः, अपदेशः, अतिदेशः, प्रदेशः, उपमानं, अर्थापत्तिः, संशयः, प्रसङ्गः, विपर्ययः, वाक्यशेषः, अनुमतं, व्याख्यानं, निर्वचनं, निदर्शनं, अपवर्गः, स्वसंज्ञा, पूर्वपक्षः, उत्तरपक्षः, एकान्तः, अनागतावेक्षणं, अतिक्रान्तावेक्षणं, नियोगः, विकल्पः, समुच्चयः, ऊह्यमिति।

यमर्थमधिकृत्योच्यते तदधिकरणम्।

शास्त्रस्य प्रकरणानुपूर्वी विधानम्।

वाक्ययोजना योगः।

पदावधिकः पदार्थः।

हेतुरर्थसाधको हेत्वर्थः।

समासवाक्यमुद्देशः।

व्यासवाक्यं निर्देशः ।
एवं वर्तितव्यमित्युपदेशः ।
एवमसावाहेत्यपदेशः ।
उक्तेन साधनमतिदेशः ।
वक्तव्येन साधनं प्रदेशः ।
दृष्टेनादृष्टस्य साधनमुपमानम् ।
यदनुक्तमर्थादापद्यते सार्थापत्तिः ।
उभयतोहेतुमानर्थः संशयः ।
प्रकरणान्तरेण समानोऽर्थः प्रसङ्गः ।
प्रतिलोमेन साधनं विपर्ययः ।
येन वाक्यं समाप्यते, स वाक्यशेषः ।
परवाक्यमप्रतिषिद्धमनुमतम् ।
अतिशयवर्णना व्याख्यानम् ।
गुणतः शब्दनिष्पत्तिर्निर्वचनम् ।
दृष्टान्तो दृष्टान्तयुक्तो निदर्शनम् ।
अभिप्लुतव्यपकर्षणमपवर्गः ।
परैरसंमितः शब्दः स्वसंज्ञा ।
प्रतिषेद्धव्यं वाक्यं पूर्वपक्षः ।
तस्य निर्णयनवाक्यमुत्तरपक्षः ।
सर्वत्रायत्तमेकान्तः ।
पश्चादेवंविहितमित्यनागतावेक्षणम् ।
पुरस्तादेवंविहितमित्यतिक्रान्तावेक्षणम् ।
एवं नान्यथेति नियोगः ।
अनेन वानेन वेति विकल्पः ।

अनेन चानेन चेति समुच्चयः।
अनुक्तकरणमूह्यम्।

एवं शास्त्रमिदं युक्तमेताभिस्तन्त्रयुक्तिभिः।
अवाप्तौ पालने चोक्तं लोकस्यास्य परस्य च॥

धर्ममर्थं च कामं च प्रवर्तयति पाति च।
अधर्मानर्थविद्वेषानिदं शास्त्रं निहन्ति च॥

येन शस्त्रं च शास्त्रं च नन्दराजगता च भूः।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमितं कृतम्॥

इति कौटलीयार्थशास्त्रे तन्त्रयुक्तौ पञ्चदशाधिकरणे प्रथमोऽध्यायः तन्त्रयुक्तयः।

APPENDIX III

श्रीमदरुणदत्तकृता

सर्वाङ्गसुन्दरा

उत्तरस्थानम्—अध्यायम् ४०, श्लोकः ७८

तन्त्र्यते-धार्यते शरीरमेनेनेति तन्त्रम्, तस्य गुणास्तन्त्रगुणाः,—यैस्तन्त्रमलंक्रियते तन्त्रयुक्त्यादयः, तैरेवंप्रकारैर्युक्तम्। तथा चोक्तं सङ्ग्रहे (उ, अ. ५०)— "अलङ्कृतं युक्तिपदैः सद्रत्नैरिव काञ्चनम्। षट्त्रिंशताऽर्थदुर्गेषु भिषजां सङ्क्रमैरिव॥ तत्र[1]ाधिकरणं [2]योगो [3]हेत्वर्थो[4]ऽर्थः पदस्य च। [5]प्रदेशो[6]द्देश[7]निर्देश[8]वाक्यशेषाः [9]प्रयोजनम्॥ [10]उपदेशा[11]पदेशा[12]तिदेशा[13]र्थापत्ति[14]निर्णयाः। [15]प्रसङ्गै[16]कान्तनै[17]कान्ताः [18]सापवर्गो [19]विपर्ययः॥ [20]पूर्वपक्ष[21]विधाना[22]नुमत[23]व्याख्यान[24]संशयाः। [25]अतीता[26]नागतापेक्षा[27]स्व[28]संज्ञो[29]ह्यसमुच्चयाः॥ [30]निदर्शनं [31]निर्वचनं [32]नियोगोऽथ [33]विकल्पनम्। [34]प्रत्युत्सार[35]स्तथोद्धारः [36]सम्भवस्तन्त्रयुक्तयः" इति।

तत्र १ अधिकरणं नाम,— यदधिकृत्य प्रवर्तते शास्त्रं स्थानमध्यायः प्रकरणं वाक्यं वा। तत्र शास्त्राधिकरणं-यदधिकृत्य शास्त्रं प्रवर्तते। यथा-अष्टावङ्गान्यधिकृत्य हृदयाख्यं सर्वं शास्त्रं प्रवृत्तम्। यथोक्तम् (हृ. सू. अ. १।५)—"कायबाल" इत्यादि। स्थानाधिकरणं यथा (हृ. सू. अ. ३०।५३)— "अत्रार्थाः सूचिताः सूक्ष्माः प्रतन्यन्ते हि सर्वतः।" इति। अध्यायोऽपि यदधिकृत्य प्रवर्तते तदध्यायाधिकरणम्। यथा (हृ. सू. अ. २)-"अथातो दिनचर्याध्यायं व्याख्यास्यामः।" इति। प्रकरणं यदधिकृत्य प्रवर्तते तत् प्रकरणाधिकरणम्। यथा (हृ. शा. अ. ३।१८)-"दश मूलसिरा हृत्स्थास्ताः सर्वं सर्वतो वपुः।" इत्यादि यावत् "इत्यवेध्यविभागार्थं प्रत्यङ्गं वर्णिताः सिराः।" इत्यादि। एवं वाक्यमपि यदधिकृत्य प्रवर्तते तद्वाक्याधिकरणं वेद्यम्।

२ योगो नाम,—योजना, उद्देशनिर्देशयोः सूत्रभाष्ययोर्वा। यथा (हृ. शा. अ. ३)-"अथातोऽङ्गविभागं शारीरं व्याख्यास्यामः।" इत्युद्दिश्याङ्गानि विभजते- "शिरोऽन्तराधिर्द्वौ बाहू सक्थिनी च समासतः। षडङ्गम्" इत्यादि। युक्तिर्वा योगः, प्रतिज्ञा हेतुर्दृष्टान्त उपनयो निगमनमिति पञ्चविधः। यथा-अग्निः शरीरस्थितेर्मूलमिति प्रतिज्ञा। अग्निपक्वाहारे सति तत्स्थितेरिति हेतुः। "तत्राग्निर्हेतुराहारान्न ह्यपक्वाद्रसादयः।" (हृ. शा. अ. ३।५४) इति वचनात्। यथा-शाल्यङ्कुरस्य बीजमिति दृष्टान्तः। उपनयो यथा-चिकित्साशास्त्रस्य प्रयोजनत्वसाधनाय बहुधा दृष्टान्तोपनयं कृतवांस्तन्त्रकृत्, "कस्यासिद्धोऽग्नितोयादिः" (हृ. उ. अ. ४०।६८) इत्यादयः। तस्मात् सप्रयोजनमेव चिकित्साशास्त्रं प्रत्यक्षफलत्वादित्युपनयः। तस्मादारम्भणीयमिति प्रमाणपदोपदर्शनमुखेन निगमनम्। यथोक्तम् (हृ. उ. अ. ४०।७३)- "चतुष्पाद्गुणसम्पन्ने सम्यगालोच्य योजिते। मा कृथा व्याधिनिर्घातं विचिकित्सां चिकित्सिते॥" साध्यव्याधिचिकित्सायां संशयानुपपत्त्या प्रतिपादितया प्रमाणफलोपसंहारकरणम्।

३ हेत्वर्थो नाम,–यदन्यप्रस्तावोक्तमन्यत्रापि तथैवोपपद्यते। यथा (हृ. शा. अ. ३।२०)–"तत्रैकैकं च शाखायां शतं तस्मिन्न वेधयेत्। सिरां जालन्धरां नाम तिस्रश्चाभ्यन्तराश्रिताः॥" इत्यादि। तथा (हृ. शा. अ. ३।३४)–"अवेध्याः सङ्कीर्णा ग्रथिताः क्षुद्राः" इत्यादि। तदेतेभ्यो विशेषवचनेभ्योऽनुमीयते शेषा वेध्या इति। अन्यथैतानि वचांसि निरर्थकानि स्युरिति।

४ पदार्थो नाम,–पदेनार्थो गम्यते। यथा-द्रव्यमिति पदम्, तस्यार्थो भूजलादिः। गुण इति पदम्, तस्यार्थो गुर्वादिः।

५ प्रदेशो नाम,–येषामर्थानामतिबहुत्वात् साकल्येनाभिधानस्याशक्यत्वात् स्तोकमुच्यते। यथोक्तम् (हृ. सू. अ. ५।८४)-"इति द्रव्यैकदेशोऽयं यथास्थूलमुदाहृतः।" इति।

६ उद्देशो नाम,–सङ्क्षेपाभिधानम्। यथा (हृ. सू. अ. १।६)–"वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः।" इत्यादि।

७ निर्देशो नाम,–तस्यैव विस्तारोक्तिः। यथोक्तम् (हृ. सू. अ. १।११)–"तत्र रूक्षो लघुः शीतः खरः सूक्ष्मश्चलोऽनिलः।" इति।

८ वाक्यशेषो नाम,–यस्मिन् सूत्रे लाघविकेनार्थाद्गम्यमानमनुक्तपूरणार्थमध्याह्रियते। यथा (हृ, शा. अ. ३।३)-"तत्र खात् खानि देहेऽस्मिन्" 'भवन्ति' इति वाक्यशेषः। "आप्या जिह्वारसक्लेदाः" (हृ. शा. अ. ३।४) इत्युत्तरत्र भवार्थे तद्धितश्रवणात्।

९ प्रयोजनं नाम,–यदर्थं शास्त्रादि प्रवर्तते। यथा (हृ. उ. अ. ४०।६४)–"आतङ्कपङ्कमग्नानां हस्तालम्बो भिषग्जितम्।" इति। अनेन प्रयोजनेन चिकित्साशास्त्रमध्येयमित्यादि।

१० उपदेशो नाम,–आप्तवचनम्। यथा (हृ. सू. अ. १७।२९)–"स्नेहक्लिन्नाः कोष्ठगा धातुगा वा स्रोतोलीना ये च शाखास्थिसंस्थाः। दोषाः स्वेदैस्ते द्रवीकृत्य कोष्ठं नीताः सम्यक्शुद्धिभिर्निर्ह्रियन्ते॥" इत्यादि।

११ अपदेशो नाम,–यदाचार्यः किञ्चिदर्थं प्रतिज्ञाय हेतुमुपदिशति। यथा (हृ. उ. अ. ४०।६४)–"जीवितं म्रियमाणानां सर्वेषामेवनौषधात्।" इति प्रतिज्ञाय हेतुमाह (हृ. उ. अ. ४०।६५)-"न ह्युपायमपेक्षन्ते सर्वे रोगाः" सर्वरोगाणामुपायापेक्षाभावात्।

१२ अतिदेशो नाम,-यत् किञ्चिदेवार्थजातमुक्त्वाऽनुक्तार्थसाधनाय एवमन्यदपि प्रत्येतव्यमिति परिभाषायां स्थापयति। यथोक्तं कर्णरोगप्रतिषेधे (हृ. उ. अ. १८।४)-"महतः पञ्चमूलस्य काष्ठात् क्षौमेण वेष्टितात्। तैलसिक्तात्प्रदीप्ताग्रात् स्नेहः सद्यो रुजापहः॥ योज्यश्चैवं भद्रकाष्ठात् कुष्ठात् काष्ठाच्च सारलात्।" इत्यादि।

१३ अर्थापत्तिर्नाम,-योऽन्येनार्थेनोक्तेन ततोऽपरोऽप्यर्थो गदित इव ज्ञायते। यथा (हृ. सू. अ. ५।३१)-" नैवाद्यान्निशि नैवोष्णम्" इत्युक्तम्, न तूक्तं दिवा भुञ्जीतेति। एतच्चार्थापत्त्या गम्यते। [ननु,] कः पुनरर्थः? का चास्यापत्तिः? ब्रूमः। दध्यभ्यवहारोऽर्थस्तत्र तन्त्रकृता 'नैवाद्यान्निशि' इति कालो निषिद्धो न तु दधिभक्षणम्। ततो योऽयमप्रतिषिद्धोऽर्थः, स आपद्यते दिवा दधिभोजनार्थः, रात्रिप्रतिषेधे दिनव्यतिरेकेण कालान्तराभावात्। सर्वथा अनभ्यवहरणीयस्याहारप्रस्तावे प्रतिषेधानुपपत्तेः। एवमन्यत्रापि व्याख्येयम्।

१४ निर्णयो नाम,-यन्निवारितस्यार्थस्य प्रतिष्ठापनम्। यथा (हृ. उ. अ. ४०।६०)-"दृश्यन्ते भगवन् केचिदात्मवन्तोऽपि रोगिणः।" इत्यादिना चिकित्साशास्त्रफलं प्रति संशयकरणे पश्चान्निर्णयार्थमुक्तम्। यथा (हृ.उ.अ. ४०।६३)-"न चिकित्सा च तुल्या भवितुमर्हति।" इत्यादि।

१५ प्रसङ्गो नाम,— पूर्वाभिहितस्यार्थस्य केनचित् सम्बन्धान्तरेण पुनरभिधानम्। यथोक्तं सिराव्यधविधौ (हृ. सू. अ. २७।२)-"लोहितं प्रवदेच्छुद्धतनोस्तेनैव च स्थितिः।" इत्युक्त्वा पुनः शारीरे शुद्धार्तवप्रसङ्गेनोक्तम् (हृ. शा. अ. १।१)-"शुद्धे शुक्रार्तवे सत्त्वः स्वकर्मक्लेशचोदितः। गर्भः सम्पद्यते युक्तिवशादग्निरिवारणौ॥" इति। न च पुनरुक्तता तस्य। यस्मात् सिराव्यधे शरीरप्रभवत्वमेव रक्तस्योक्तम्, न तु क्रमो वर्णितः। शारीरे तु ययाऽऽनुपूर्व्या शरीरहेतुः स्यात् तद्विस्तरेणोक्तम्। यथा (हृ. शा. अ. १।२)- "बीजात्मकैर्महाभूतैः सूक्ष्मैः सत्त्वानुगैश्च सः। मातुश्चाहाररसजैः क्रमात् कुक्षौ विवर्धते॥" इति।

१६ एकान्तो नाम,-य एकमेव पक्षमव्यभिचारेण श्रयति नान्यम्। तद्यथा (हृ. सू. अ. ४।३१)- "ये भूतविषवाय्वग्निक्षतभङ्गादिसम्भवाः। रागद्वेषभयाद्याश्च ते स्युरागन्तवो गदाः॥" इति।

१७ नैकान्तो नाम,–अन्यतरपक्षानवधारणात्। यथा (ह्र. सू. अ. ४०।६४)–"जीवितं म्रियमाणानां सर्वेषामेव नौषधात्।" एकान्तेन (ह्र. उ. अ. ४०।६५)–"न ह्युपायमपेक्षन्ते सर्वे रोगाः" इत्यादि।

१८ अपवर्गो नाम,–साकल्येनोत्कृष्टस्य यत्पुनस्तदेकदेशापकर्षणम्। यथा (ह्र. सू. अ. २७।४)-"शीतोष्णस्निग्धरूक्षाद्यैरुपक्रान्ताश्च ये गदाः। सम्यक् साध्या न सिद्ध्यन्ति ते च रक्तप्रकोपजाः॥ तेषु स्रावयितुं रक्तमुद्रिक्तं व्यधयेत्सिराम्।" इत्युत्सर्गमभिधाय एकदेशेऽपवादं वक्ति (ह्र.सू.अ.२७।६)–"न तूनषोडशातीतसप्तत्यब्दस्रुतासृजाम्।" इत्यादि।

१९ विपर्ययो नाम,–यथोपदिष्टविपर्ययेण लक्षणादिकरणम्। यथोक्तम् (ह्र. सू. अ. १६।३०)–"वातानुलोम्यं दीप्तोऽग्निर्वर्चः स्निग्धमसंहतम्। स्नेहोद्वेगः क्लमः सम्यक् स्निग्धे, रूक्षे विपर्ययः॥" इति।

२० पूर्वपक्षो नाम,–प्रतिज्ञातार्थसंदूषणं वाक्यम्। यथा हिताहितविभागं प्रत्याचिख्यासन्नाह। यथा (ह्र. उ. अ. ४०।६०)–"दृश्यन्ते भगवन् केचित्" इत्यारभ्य यावत् "हिताहितविभागस्य फलं तस्मादनिश्चितम्।"इत्यादि।

२१ विधानं नाम,–यत्प्रकरणानुपूर्वं विधानमावेक्ष्यते।

२२ अनुमतं नाम,–(ह्र. सू. अ. ९।१०)–"उष्णं शीतं द्विधैवान्ये वीर्यमाचक्षतेऽपि च। नानात्मकमपि द्रव्यमग्नीषोमौ महाबलौ॥" इत्यादिना ह्यनुमतम्, न विघातः कृतः।

२३ व्याख्यानं नाम,–यन्मादृशेभ्यो विशिष्टतरबुद्धिगम्यम्। यथा (ह्र. शा. अ. १।३७)–"सप्ताहात् कललीभवेत्।" (ह्र. शा. अ. १।४९)–"द्वितीये मासि कललात् घनः पेश्यथवार्बुदम्। पुंस्त्रीक्लीबाः क्रमात्" इति। न ह्यत्र गर्भस्यावर्तमाना भावाः शक्या विज्ञातुं योगिदृष्टिं मुक्त्वा।

२४ संशयो नाम,–साकाङ्क्षत्वमनिश्चितवस्तुविज्ञानम्। यथा (ह्र. शा. अ. ५।१२८)–"संशयं प्राप्तमात्रेयो जीवितं तस्य मन्यते।" इत्यादि।

२५ अतीतापेक्षणं नाम,–यदतिक्रान्तमपेक्ष्य प्रस्तुतस्य साधनमुच्यते। यथोक्तं हृद्रोगचिकित्सिते (ह्र. चि. अ. ६।३९)– "रास्नाजीवक" इत्यादि यावत् "महास्नेहं विपाचयेत्॥" इति। अत्र च न

जायते कतमो महास्नेह इति। तदेतदतिक्रान्तमपेक्ष्य प्रसाध्यते स्नेहविध्युक्तम्। यथा (हृ. सू. अ. १६।४)-"द्वाभ्यां त्रिभिश्चतुर्भिस्तैर्यमकस्त्रिवृतो महान्।" इत्यपेक्ष्य व्याख्यायते।

२६ [अनागतापेक्षा नाम,-] ....

२७ स्वसंज्ञा नाम,-या तन्त्रकारैः स्वतन्त्रसंव्यवहारार्थं प्रणीता सती परतन्त्रेषु न व्यवहरति। यथा (हृ. सू. अ. १२।४४)- "शाखा रक्तादयस्त्वक् च" इति।

२८ ऊह्यं नाम,-यदप्रतिबद्धं ग्रन्थे स्वयं प्रज्ञया तर्कयित्वा योज्यम्। यथोक्तम् (हृ. सू. अ. १५।४६)- "त्रयस्त्रिंशदिति प्रोक्ता वर्गास्तेषु त्वलाभतः। युञ्ज्यात्तद्विधमन्यच्च द्रव्यं जह्यादयौगिकम्॥" [इति।]

२९ समुच्चयो नाम,-यथा (हृ. सू. अ. १८।२९)- 'पेयां विलेपीमकृतं कृतं च यूषं रसं" च समुच्चिनोति, तथा-"त्रीनुभय तथैकम्। क्रमेण सेवेत नरोऽन्नकालान् प्रधानमध्यावरशुद्धिशुद्धः॥" इति।

३० निदर्शनं नाम,-यन्निदर्शयितव्यं सूक्ष्ममप्यर्थं स्वधर्मसादृश्यात्। स्पष्टीकरोत्यादर्श इव मुखविधुम्। यथोक्तम् (हृ. सू. अ. १९।८४)-"यथा कुसुम्भादियुतात्तोयाद्रागं हरेत्पटः। तथा द्रवीकृतात् देहाद् बस्तिर्निर्हरते मलान्॥" इत्यादि।

३१ निर्वचनं नाम,-निर्णयार्थं वचनं निरुक्तम्। यथोक्तं विषविधाने (हृ. उ. अ. ३५।१)- मथ्यमाने जलनिधावमृतार्थं सुरासुरैः।" यावत् "जगद्विषण्णं तं दृष्ट्वा तेनासौ विषसंज्ञितः॥" इति। विषस्य निर्वचनं जगद्विषदनाद्विषमिति।

३२ नियोगो नाम,-यो यस्यानुष्ठेयः। यथा (हृ. सू. अ. १६। २६)- "उष्णोदकोपचारी स्यात्" इत्यादि।

३३ विकल्पो नाम,-विविधं कल्पनम्, इदं कार्यमिदं वाकार्यम्। यथोक्तं पूर्वरूपदर्शने ज्वरादौ [वा] हितं लघ्वशनमपतर्पणं वा।

३४ प्रत्युत्सारो नाम,-यत्रोपपत्तिं दर्शयन्तः परस्परमतानि निवारयन्ति। तद्यथा (हृ. शा. अ. ३।१६)- "अस्थ्नां शतानि षष्टिश्च त्रीणि दन्तनखैः सह। धन्वन्तरिस्तु त्रीण्याह, सन्धीनां च शतद्वयं॥

दशोत्तरं, सहस्रे द्वे निजगादात्रिनन्दनः ।'' इति पूर्वमतात् षष्टिं प्रत्युत्सारयति । धन्वन्तरेरपि मतं दशोत्तरं सन्धिशतद्वयमिति पुनर्वसुः प्रत्युत्सारयति सन्धिसहस्रद्वयं साधयन् ।

३५ उद्धारो नाम,–शास्त्रारम्भप्रत्याख्यानादिचोद्यस्य समाधानम् । तद्यथा (हृ. उ. अ. ४०।६०)– ''दृश्यन्ते भगवन् केचिदात्मवन्तोऽपि रोगिणः ।'' यावत् ''हिताहितविभागस्य फलं तस्मादनिश्चितम् ।'' इति कृते चोद्ये (हृ. उ. अ. ४०।३३)– ''न चिकित्साऽचिकित्सा च तुल्या भवितुमर्हति'' इति परिहारः ।

३६ सम्भवो नाम,–उपपत्तिर्यस्मिन्नुपपद्यते अनुपदिष्टे । यथा (हृ. सू. अ. २३।४७)– ''दुष्टरक्तापगमनात् सद्यो रागरुजां शमः ।'' इत्युक्तम् । प्रच्छानालाबुजलौकाशृङ्गसिराव्यधैर्यथासम्भवं रक्तमपनीयते । यथोक्तम् (हृ. सू. अ. २६।५३)– ''प्रच्छानेनैकदेशस्थं ग्रथितं जलजन्मभिः । हरेच्छृङ्गादिभिः सुप्तमसृग्व्यापि सिराव्यधैः ॥'' इति । एवमन्यत्रापि सम्भवार्थो योज्यः ।

व्याख्या अपि तन्त्रस्य गुणः । ताभिरपि तन्त्रमलङ्क्रियते । ताश्च पञ्चदश प्रकाराः । तद्यथा,– पिण्ड[1]पद[2]पदार्थ[3]अधिकरण[4]प्रकरण[5]अर्थ[6]कृच्छ्र[7]फल[8]उच्चितक[9]न्यास[10]प्रयोजन[11]अनुलोम[12]प्रतिलोम[13]अतिसूत्र[14]समस्त[15]व्याख्याः ।

तत्र पिण्डव्याख्या नाम,–सङ्क्षेपतया सूत्ररूपेणाध्यायादीनां व्याख्या । यथा (हृ. शा. अ. ५।४)– ''रूपेन्द्रियस्वरच्छायाप्रतिच्छायाक्रियादिषु । अन्येष्वपि च भावेषु प्राकृतेष्वनिमित्ततः ॥ विकृतिर्या समासेन रिष्टं तदिति लक्षयेत् ।'' इत्यनेन सूत्रेण सकलरिष्टाध्यायसमास उक्तः ।

२ पदव्याख्या नाम,–यत्पदानां छेदं कृत्वोच्चारणम् । यथा (हृ. सू. अ. १)– ''अथ अतः आयुष्कामीयं अध्यायं वि आख्यास्यामः ।'' इति सप्तपदं सूत्रं पूर्वं व्याख्यातम् ।

३ पदार्थव्याख्या नाम,–तेषामेव पदानां विवरणम् । यथा– अथशब्द आनन्तर्ये अधिकारे वा, अतःशब्दो हेतावित्यादि ।

४ अधिकरणव्याख्या नाम,–यद्वस्तुकृतमारभ्य तदनुषङ्गेण व्याख्यानमारभ्यते । यथा (हृ. सू. अ. २)– ''अथातो दिनचर्याध्यायं

व्याख्यास्यामः ।'' इति प्रस्तुत्य ''ब्राह्मे मुहूर्ते उत्तिष्ठेत्स्वस्थो रक्षार्थमायुषः ।'' इत्यादिना सैव दिनचर्या विवृत्य व्याख्यायते सविस्तरा ।

५ प्रकरणव्याख्या नाम,–यस्मिन्नर्थे सूत्रे वा प्रकृतेनाप्रकृतं साध्यते, यथा–त्रिलवणाद्ये चूर्णे गुणानुक्त्वाऽभयाख्ये एवमाह 'समानं पूर्वेण' इति । तत्र समानगुणता व्याख्याता ।

६ अर्थव्याख्यानाम,–यत्र प्रकरणे सूत्रे वा स्वभावस्योपवर्णनं क्रियते । तद्यथा,–प्रकृतिरुच्यते स्वभावः । स पुनराहारौषधद्रव्याणां स्वाभाविको गुर्वादिगुणयोगः । तद्यथा,–माषमुद्गयोः सूकरैणयोश्च ।

७ कृच्छ्रव्याख्या नाम,–यत्र लेशत उक्तानामविस्पष्टानां प्रकरणे सूत्रे वा अर्थानां यत्नत उद्भावनं क्रियते । तद्यथा (ह. सू. अ. २।३०)– ''अनुयायात्प्रतिपदं सर्वधर्मेषु मध्यमाम् ।'' इति लेशतो ब्रुवाणः शास्त्रकारः सर्वेषु हेतुलिङ्गौषधादिषु मध्यमा प्रतिपदाश्रयणीयेति सूचयति ।

८ फलव्याख्या नाम,–यत्र वस्तुनि बहुष्वनिश्चितार्थेष्वेकीयमतेषु प्रस्तुतेषु वस्तुसारभूतं स्वमतं स्वमर्थमुपनिक्षिप्यैकीयमतानि तस्मिन्नेव स्वमतेऽन्तर्भावं नयति । यथा–निरूह मात्रापुटकादिष्वियत्तायां साध्यायां च निश्चितानि महर्षिभिर्बहूनि मतानि प्रशस्तानि । यथा–''द्वादशप्रसृतो निरूहः कार्यः'' इत्येके । ''मात्रां त्रिपलिकां कुर्यात् स्नेहमाक्षिकयोः पृथक् ।'' (ह. सू. अ. १९।४४) इत्याद्यन्ये । तदेतानि मतानि दोषौषधबलापेक्षया स्वमतान्तर्भावितानि प्रमाणानि च । यथोक्तम् (ह. सू. अ. १९।६२)– ''दोषौषधादिबलतः सर्वमेतत्प्रमाणयेत् ।'' अन्योन्यविरुद्धमपि ''सम्यङ्निरूढलिङ्गं तु नासम्भाव्य निवर्तयेत् ॥'' इति ।

९ उचितकव्याख्या नाम,–यस्मिन् सूत्रे निदर्शनभूतान्युदाहरणानि तन्त्रान्तः समाकृष्यार्थः शस्यते । यथा-पृथिव्यादिषु च महाभूतसंज्ञा स्थापिता, रसादिषु च धातुसंज्ञा निवेशिता । ''रसासृङ्मांसमेदोस्थिमज्जशुक्राणि धातवः ।'' (ह. सू. अ. १।१३) इति । पुनरुच्यते (ह. शा. अ. ३।६५)– ''परस्परोपसंस्तम्भाद्धातुस्नेहपरम्परा ।'' इति । अत्र किं धातोर्ग्रहणेन भूतान्यपि धातुशब्दवाच्यानि भवन्ति ? इति ।

१० न्यासव्याख्या नाम,–यस्मिन्नधिकारे वर्तमाने तेनाधिकरणार्थेन सहितं सम्बन्धमभिवीक्ष्यान्यस्यार्थो विनिक्षिप्यते ।

यथा (हृ.उ.अ. ४०।६०)–"दृश्यन्ते भगवन्केचिदात्मवन्तोऽपि रोगिणः।" इति हिताहितविभागस्य फलं प्रति संशयमभिवीक्ष्य "न चिकित्साऽचिकित्सा च तुल्या भवितुमर्हति।" (हृ. उ. अ. ४०।६३) इत्यादिना उत्तरं दत्त्वा तेनैव प्रसङ्गेनान्योऽर्थो निक्षिप्यते। यथा (हृ. उ. अ. ४०।७५)– "एतत्तदमृतं साक्षाज्जगदायासवर्जितम्। याति हालाहलत्वं तु सद्यो दुर्भाजनस्थितम्॥" इति। एवमन्येषामप्यर्थानां सम्बन्धमवधार्य व्याख्याऽर्थार्हा कल्पनीया।

११ प्रयोजनव्याख्या नाम,–यत्सूत्रमभिधीयमानं स्वार्थस्य निष्पत्तौ निमित्तभावमुपैति। यथा–उक्तोऽङ्गविभागेऽनेकधा सिराविस्तरः। न च तेन सिराविस्तरणोक्तेन किञ्चिदिहोपकारो दृश्यते। यदि प्रकरणावसरे प्रयोजनमिदं ब्रूयात् "इत्यवेध्यविभागार्थं प्रत्यङ्गं वर्णिताः सिराः।" (हृ. शा. अ. ३।३३) एतदर्थं सिरावरणं प्रवृत्तम्। कश्चिदयं वैद्यो वेध्यावेध्यविभागं सिराणां जानीयादिति।

१२ आनुलोम्यं नाम,–येन ... ...

तत्र १–२ प्रधान कल्पना द्विधा,–प्रधानस्य कल्पना प्रधानेन वा कल्पना प्रधानकल्पना। प्रधानस्य कल्पना यथा–सर्पिः स्नेहनम्, क्षीरं जीवनम्, मधु सन्धानकृत्, इत्यत्र मध्ये प्रकृष्टगुणत्वात् सर्पिः क्षीरे स्नेहजीवने कल्प्येते, न तु तैलतोयादिष्वपि स्नेहजीवनत्वं नास्तीति। माक्षिकं च सन्धाने प्रधानत्वात् सन्धानकृदित्युक्तम्, न तु सिक्थकमधुयष्टिकादिष्वपि सन्धानकृत्वं नास्तीति। प्रधानेन तु कल्पना यथा–क्षीरदधितक्रमस्तुनवनीतक्षीरघृतपुराणघृतकिलाटपीयूषकूर्चीकामोरणादिवर्गः सर्वः क्षीरवर्ग इत्युक्तः क्षीरप्राधान्यात्। प्रधानेन कल्पनाव्यपदेश इत्येकोऽर्थः।

३ गुणकल्पना नाम,–येन धर्मेणोपेतोऽर्थः प्रयुज्यमानः समर्थो भवति, तेन धर्मेण युक्तस्य तस्यासावगुणोऽपि गुर्वादिष्वपाठाद्गुण इति कल्प्यते। यथोक्तम् (हृ. सू. अ. १।२९)– "भिषक् द्रव्याण्युपस्थाता रोगी पादचतुष्टयम्। चिकित्सितस्य निर्दिष्टं प्रत्येकं तच्चतुर्गुणम्॥" इत्यादि। दक्षत्वादिचतुर्गुणनिर्देशः सर्वथा प्रशंसागुण इति गम्यते।

४ लेशकल्पना नाम,–अनुपदिष्टस्य विधेः कण्ठपाठेन यत्किञ्चित्सूत्रावयवान्तरमाश्रित्यार्थः कल्प्यते। यथा–नात्र शास्त्रे कालमृत्योर-

कालमृत्योर्वा किञ्चिल्लक्षणं प्रणीतम्। तत्तु लेशतोऽनुमीयते। कथमिति, यदा हि कालनियतमायुः क्षयं प्राप्तं भवति, तदा रिष्टमुत्पद्यते, न विषमपरिहारेण म्रियमाणे नरे। उक्तं हि (हृ. शा. अ. ५।६०)–"भिषग्भेषजपानान्नगुरुमित्रद्विषश्च ये। वशगाः सर्वे एवैते विज्ञेयाः समवर्तिनः॥" इति। अत्र विकृतिविज्ञानीये गुरुमित्रद्विषश्चेति चशब्दोऽस्माच्छ्लोकात् पूर्वकाणि यानि चोत्तराणि तानि सर्वाण्येव समुच्चिनोति। समवर्ती हि कालो मृत्युरिष्टः, इतरस्त्वसमवर्ती। अत एव चाचष्टे तन्त्रान्तरे–"कालमृत्योरेव रिष्टानि नाकालमृत्योः।" इति स्वाभिप्रायप्रकाशनार्थं तन्त्रकारः शकटोदाहरणं दत्तवान्। यथा–सम एव वाह्यमानः स्वप्रमाणक्षये भङ्गपूर्वरूपाण्याप्नोति। तथा नियतायुषः स्वप्रमाणक्षये रिष्टसम्भवः। यथा च-स एवातिभारक्रान्तत्वाद्विषमपथाश्रितत्वादकालेऽपि क्षयमाप्नोति। तथा अनियतायुषो रिष्टोत्पत्तिमन्तरेण मृत्युः। यदि पुनरनियतायुषोऽपि रिष्टोत्पत्तिपूर्वं मरणं कल्प्येत, तदा वार्षिके षाण्मासिके वाऽरिष्टे समुत्पन्ने शुभहेतुयोगान्न मृत्युः स्यात्। अनियतायुषो हि सम्यगुपचाराज्जीवितानुवृत्तिः। विषमहेत्वपरिहारान्मृत्युः। अत एवानियतायुषमधिकृत्य रसायनान्युपदिष्टानि। तद्योगादयं बहून्यपि वर्षाणि जीवेत्। नियतायुषस्तु कालमृत्युर्वर्षशतात् परेण जीवितं न निर्दिष्टम्। यथोक्तं शारीरे (हृ. शा. अ. ५।१३२)– "मरणं प्राणिनां दृष्टमायुःपुण्योभयक्षयात्। तयोरप्यक्षयाद् दृष्टं विषमापरिहारिणाम्॥" इति। तस्मादविशेषोक्तावपि नियतायुष एवारिष्टोत्पत्तिपूर्वं मरणमिति निश्चितम्। तथा च "ऋतुचर्याध्यायं व्याख्यास्यामः।" (हृ. सू. अ. ३) इति प्रतिज्ञायां षड्ऋतुविशेषे प्रतिपत्तिर्भवति। न तु ऋतुस्तु द्वादश निशाः" (हृ. शा. अ. १।२६) अस्य ऋतोरिति।

५ विद्याकल्पना नाम,–यथा सर्वविद्यानुगतार्थनिर्देशे शास्त्रकारस्य सर्वविद्यास्थानानुप्रवेश इह शास्त्रे हित इति वचनाद्विनाऽपीष्यते। तत्र "आर्द्रसन्तानता त्यागः" (हृ. सू. अ. २।४५) इत्यादिना वाक्येन बुद्धिचन्तनविषय अध्यात्मविद्यासङ्ग्रह इङ्ग्यते। "अर्चयेद्देवगोविप्र" (हृ. सू. अ. २।२३) इत्यादिना धर्मशास्त्रोपदेशसङ्ग्रहः। तथा "जगद्विषण्णं तं दृष्ट्वा तेनासौ विषसंज्ञितः।" (हृ. उ. अ. ३५।२)

इत्यादिना पदव्युत्पादनान्निरुक्तकरणाच्च शब्दविद्याया निरुक्तेश्चोपसङ्ग्रहः। "साधकेऽहनि" (हृ. शा. अ. १।७३) सूतिकां गृहं प्रवेशयेत्। तथा– "भरणीकृत्तिकाश्लेषापूर्वार्द्रापितृनैर्ऋते।" इति ज्योतिः शास्त्रोपरोधः। विचित्रभूषितशास्त्रस्योत्प्रेक्षणीयम्।

६ भक्ष्यकल्पना नाम,–"एतत्तदमृतं साक्षात्" (हृ. उ. अ. ४०। ७५) इत्यादि।

७ आज्ञाकल्पना नाम,–यस्यानुष्ठाने हेतुः सम्यगवन्तुं न शक्यः, केवलमाप्तवचनं प्रमाणीकृत्यानुष्ठीयते। यथा–"न छिन्द्यात्तृणम्, न भुवं लिखेत्" इति। न ह्यत्र हेतुर्वक्तुं शक्यते, एतदनुष्ठेयमिति।

इयं सप्तविधा कल्पना त्रिंशत्याश्रया भवति। यथा— १ आदिलोपः, २ मध्यलोपः, ३ अन्तलोपः, ४ उभयपदलोपः, ५ आदिमध्यान्तलोपः, ६ वर्णोपजननम्, ७ ऋषिक्लिष्टम्, ८ तन्त्रशीलम्, ९ तन्त्रसंज्ञा, १० प्राकृतम्, ११ समानतन्त्रप्रत्ययः, १२ परतन्त्रप्रत्ययः, १३ हेतुहेतुकधर्मः, १४ कार्यकारणधर्मः, १५ आद्यन्तविपर्ययः, १६ शब्दान्तरम्, १७ प्रत्ययः, १८ उपनयः, १९ सम्भवः, २० विभवः, [इति।]

१ तत्र आदिलोपो [नाम],–यथा (हृ. सू. अ. ६।३२)–"बृंहणः प्रीणनो वृष्यश्चक्षुष्यो व्रणहा रसः।" इत्यत्र मांसशब्दलोपेन। तथा च (हृ. नि. अ. १।१४)–"धारणोदीरणनिशा" इत्यादौ धारणं–वेगधारणम्, उदीरणं–वेगोदीरणमिति।

२ मध्यलोपो [नाम],–यथा (हृ. सू. अ. ५) - "द्रवद्रव्यविज्ञानीयमध्यायं व्याख्यास्यामः।" इत्यत्र द्रवद्रव्यस्वरूपविज्ञानीयो द्रवद्रव्यविज्ञानीय इत्युक्तः, अनन्तरं "अन्नस्वरूपविज्ञानीयः" (हृ. सू. अ. ६) इत्यत्र स्वरूपशब्दश्रवणात्।

३ अन्तलोपो नाम,–यथा (हृ. शा. अ. ३।३७)–"कफं पुनः। गौर्यः स्निग्धाः शिराः शीता वहन्ते" इत्यत्रास्रशब्दस्य लोपो द्रष्टव्यः, पूर्वत्रास्रशब्दस्य प्रकृतत्वात्। यथोक्तम् (हृ. शा. अ. ३।३६)–"तत्र श्यावारुणाः सूक्ष्माः पूर्णरिक्ताः क्षणात् सिराः। प्रस्पन्दिन्यश्च वातास्रम्" इति। एवमिहापि कफास्रं वहन्त इत्यनुमेयम्, तुल्यजातीयत्वात्।

४ उभयपदलोपो [नाम],-यथा (हृ.शा.अ. ३।५७) - "आदौ षड्रसमप्यन्नं मधुरीभूतमीरयेत्।" इति वचने 'मध्ये' "विदाहादम्लतां ततः॥ पित्तमामाशयात्कुर्याच्च्यवमानं च्युतं पुनः।" 'अन्ते' "अग्निना शोषितं पक्वं पिण्डितं कटु मारुतम्॥" इति। आदिशब्दश्रवणात् मध्यान्तशब्दावत्र लुप्तनिर्दिष्टौ द्रष्टव्यौ।

५ आदिमध्यान्तलोपो [नाम],-यथा (हृ. शा. अ. ३।५५)- "अन्नं कालेऽभ्यवहृतं" आदौ, "कोष्ठं प्राणानिलाहृतम्।" मध्ये, अन्ते च "द्रवैः" इत्यादि।

६ वर्णोपजननं नाम,-यत्रानुक्तो ग्रन्थे वर्ण आचार्येण पश्चाद् व्याख्याकाल उपजन्यार्थोऽभिधीयते। [यथा] (हृ. शा. ३।३)-"तत्र खात्खानि देहेऽस्मिन् श्रोत्रं शब्दो विविक्तता।" तथा-"वातात्स्पर्शत्व-गुच्छ्वासा वह्नेर्दृग्रूपपक्तयः॥" 'भवन्ति' इति वर्णत्रयमुपजन्य व्याख्या करणीया। "आप्या जिह्वारसक्लेदा घ्राणगन्धास्थि पार्थिवम्।" इति द्वयोर्भूतयोर्भवार्थे तद्धितप्रत्ययश्रवणात्। वाक्यशेषोऽप्ययमेवंप्राय एव।

७ ऋषिक्लिष्टं नाम,-यदृषी ऋषिपुत्रो वाऽसमाहितचित्ततयाऽशक्त्या वा किञ्चित्पदजातम(जातं)भ्रष्टमुच्चारितवान् तथैव तल्लोके प्रयुज्यते। यथा-'रोम-लोम' इत्यादि।

८ तन्त्रशीलं नाम,-या तन्त्रकारण प्रकृतिः स्वभाव इत्यर्थः। यथा-किञ्चिच्छिष्यानुग्रहार्थं विस्तीर्णं सङ्क्षिपन्ति, यथा (हृ. शा. अ. ३।१६)-"अस्थ्नां शतानि षष्टिश्च त्रीणि दन्तनखैः सह।" इति न तान्यङ्गुलिहस्तपादमणिबन्धादिविभागेन विस्तारितानि। किञ्चिद्वि-स्तारयन्ति, यथा-तत्रैवाङ्गविभागे सिरा विस्तारिताः (हृ.शा.अ. ३।३६)-इत्यवेध्यविभागार्थं प्रत्यङ्गं वर्णिताः सिराः।" इति वचनादिति।

९ तन्त्रसंज्ञा नाम,-यत्कस्मिंश्चिदर्थे मध्ये व्याख्यायमाने स्वतन्त्र-सिद्धोदाहरणं तत्प्रमाणार्थमुच्यते। यथा-नवज्वरे कषाया अपक्वेषु दोषेषु वर्जनीया उक्ताः, (हृ. चि. अ. १।३९)-"ततः पक्वेषु दोषेषु लङ्घनाद्यैः प्रशस्यते। कषायो दोषशेषस्य पाचनः शमनोऽथवा॥" इति विशेषवचनात्तत्र स्वरसादेः पञ्चविधस्य कषायस्य प्रतिषेधः प्रसक्तः।

तत: स्वतन्त्रसंज्ञया विशेष: प्रतिषिध्यते (हृ. चि. अ. १।४०)–"तिक्त: पित्ते विशेषेण प्रयोज्य:, कटुक: कफे।" इत्यादि। तस्मात् स्वतन्त्र-संज्ञया तिक्तकटुकषायौ निषिद्धौ पञ्चविधया स्वरसादिकल्पनया।

१० प्राकृतं नाम, - "ऊषकस्तुत्थकं हिङ्गु कासीसद्वयसैन्धवम्।" (हृ. सू. अ. १५।२३) इत्यौषधाधिकारात् सैन्धवं-लवणम्, न त्वश्वादिकम्।

११ समानतन्त्रप्रत्ययो नाम,–यत्साध्यस्य कस्यचिदर्थस्य साधनायानुपलभ्यमाने स्वतन्त्राद् प्रत्यये समानेभ्यस्तन्त्रेभ्य: प्रत्यय इति। उदाहरणं यथा (हृ. सू. अ. २।३१) - "नीललोमनखश्मश्रु:" इत्याचारेषूक्तम्। इयद्भिरियद्भिर्दिनै: केशनखश्मश्रूण्यवतार्य नीचलोमादिना भवितव्यमिति नोक्तम्। ततो व्याख्याकारा: क्षारपाणिप्रभृतय: प्रसिद्धा दशरात्रेण केशादीनां संग्रहणमिति निश्चिन्वन्ति। मुनिस्त्ववादीत् (च. सू. अ. ८।१८)–"त्रि: पक्षस्य केशश्मश्रुलोमनखान् संहारयेत्।" इति।

१२ परतन्त्रप्रत्ययो नाम,–यस्यार्थस्य प्रसिद्धितो न स्वकीयमुदाहरणं शक्यमभिधातुं नाप्यन्येभ्यो भिषक्तन्त्रेभ्य:। ततस्तस्मिन् द्वये परतन्त्रादुदाहरणं कल्प्यते। यथा (हृ. सू. अ. १।१९)–"कालार्थकर्मणां योगो हीनमिथ्यातिमात्रक:। सम्यग्योगश्च विज्ञेयो रोगारोग्यैककारणम्॥" इत्युक्तम्। योगस्य च लक्षणं नोक्तं तन्त्रे अन्यत्र वा भिषक्तन्त्रे। तत्र बौद्धतन्त्रप्रत्ययेन निश्चीयते-"स्वहेतुभ्य: शीतोष्णादिलक्षणेन कालस्योत्पत्तिरेव योग:।" इति।

१३ हेतुहेतुकधर्मो नाम,–यो हेतुहेतुकेन धर्मो ज्ञायते। यथा–पित्तातिसारिण: पित्तलातिसेवनात् पित्तमुद्रिक्तं रक्तातिसाराय न चिरादस्य भविष्यतीत्यनुमीयते, समर्थस्य हेतो: स्वकार्यस्याव्यभिचारात्।

१४ कार्यकारणधर्मो नाम,–यत्र कार्यसंज्ञया कारणं निर्दिश्यते कारणसंज्ञया वा कार्यं, तत्र कार्यसंज्ञया तावत्कारणं निर्दिश्यते। यथा–दोषा अपि रोगशब्दं लभन्ते। तत्र दोषा: कारणम्, "सर्वेषामेव रोगाणां निदानं कुपिता मला:।" (हृ. नि. अ. १।१२) इति वचनात्। स चेदानीं

दोषो रोग इति व्यपदिश्यमानः कारणे दोषे कार्यं रोग उपचरितो भवति। एवं कार्यं कारणसंज्ञया निर्दिश्यते।

१५ आद्यन्तविपर्ययो नाम,–यथा–अन्नस्वरूपविज्ञानं प्राप्तमुज्झित्वा पानमेव प्रथममुक्तं द्रवद्रव्यविज्ञानं कुर्वता, तोयादीनां पञ्चानां वर्गाणामल्पवक्तव्यत्वात्। समुद्रोपमतया शास्त्रस्यानुपूर्वसुखावगाहनार्थम्, पूर्वं ह्यल्पं सुखेनावगाह्यते पश्चात्प्रभूतमिति न्यायात्।

१६ शब्दान्यत्वं नाम,–यदर्थं पर्यायशब्दं वर्णयन्ति शास्त्रकृतः। यथा (हृ.नि.अ. १।१)– "रोगः पाप्मा ज्वरो व्याधिर्विकारो दुःखमामयः। यक्ष्मातङ्कगदाबाधाः शब्दाः पर्यायवाचिनः॥" इत्यादि।

१७ प्रत्ययधर्मो नाम,–यो न च हेतुर्हेतुधर्मोपवृत्तिमात्रेण च केनचिद्धेतुत्वेन व्यपदिश्यते। यथा–देवदानवगन्धर्वोन्मादापस्मारादिविचित्रग्रहविकारा उक्ताः। यथोक्तम् (हृ. उ. अ. ४।१३)–"फुल्लपद्मोपममुखं सौम्यदृष्टिमकोपनम्।" यावत् "अनिद्रमप्रधृष्यं च विद्याद्देववशीकृतम्॥" इत्यादि। न चैते परमार्थतो हेतवः, किं तर्हि? प्रज्ञापराधः। तथा चोक्तम् (हृ. उ. अ. ४।३)– "हेतुस्तदनुषक्तौ तु सद्यःपूर्वकृतोऽथवा। प्रज्ञापराधः सुतराम्" इति।

१८ उपनयो नाम,–सूत्रहेतुप्रस्तावेन यत्रान्यत्प्रकरणमुपनीयते। यथा मात्राशितीये आहारमात्रालक्षणप्रस्तावे अतिमात्रभोजननिमित्ताया विसूचिकायाश्चिकित्सा उपनीता। मात्रायां हि विभज्यमानायामवश्यमूनातिमात्रेऽपि विभजनीये तदपेक्षया मात्रायाः सम्यक् प्रतिपादनसौकर्यात् तत्प्रस्तावेन च विसूचिकायाश्चिकित्सा।

१९ सम्भवो नाम,–यत्सूत्रं प्रकरणं वा विधीयमानमर्थस्य व्यापकत्वात् सकलेन शास्त्रेण व्याख्यायते। यथा (हृ. सू. अ. १।५)– "कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्राजरावृषान्। अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संश्रिता॥" इति। एतान्यष्टावङ्गानि सकलेन शास्त्रेणोपदिश्यन्त इत्याचार्यः प्रतिजानीते।

२० भङ्ग्या ...... विभवकल्पनायाश्चास्यायं विशेषः। अयं व्याख्याया विभवो भवति। स तु विनैव व्याख्यायाः पठ्यमान एवेति।

सप्तदश ताच्छील्यादी[नी]त्युक्तम्। तद्यथा—१ ताच्छील्यम्, २ अवयवः, ३ विकारः, ४ सामीप्यम्, ५ भूयस्त्वम्, ६ प्रकारः,

७ गुणिगुणविभवः, ८ संसक्तता, ९ तद्धर्मता, १० स्थानम्, ११ तादर्थ्यम्, १२ साहचर्यम्, १३ कर्म, १४ गुणनिमित्तता, १५ चेष्टानिमित्तता, १६ मूलसंज्ञा, १७ तात्स्थ्यम्, इति।

तत्र १ ताच्छील्यं नाम,–यत्केनचिदेवं धर्मसादृश्येन युक्तो भावस्ताच्छील्यमुच्यते। यथा (हृ. नि. अ. १५।१५)– "सर्वाङ्गसंश्रयस्तोदभेदस्फुरणभञ्जनम्। स्तम्भनाक्षेपणस्वापसन्ध्याकुञ्चनकम्पनम्॥ कुपितोऽनिलः करोति।" इत्यन्ते न त्वङ्गानि स्वपन्ति। किं तर्हि ? देवदत्तः स्वपिति। तद्धर्मसादृश्यादङ्गानि स्वापशब्देनोच्यन्ते। तद्यथा—"पुरुषः सुप्तो न किञ्चिद्वेदयते। न चेतयते। तथाऽङ्गमपि यत्किञ्चिन्न वेदयते नखतोदादि। तत्सुप्तमिव सुप्तमित्युच्यते।" [इति।]

२ अवयवो नाम,–यत्रैकदेशोदाहरणे क्रियमाणेऽनुक्तोऽन्योऽपि तज्जातीयकोऽर्थो लभ्यते। यथा (हृ. चि. अ. १।३)–"लङ्घनैः क्षपिते दोषे दीप्तेऽग्नौ लाघवे सति। स्वास्थ्यं क्षुत्तृड्रुचिः पक्तिर्बलमोजश्च जायते॥" इत्यनेनैकदेशोदाहरणेन लङ्घनेन दोषक्षपणेन लाघवे सति स्वास्थ्याद्युत्पत्तिः। तत्प्रतिपक्षेण त्वलङ्घनेन दोषक्षपणे न जाते सत्यस्वास्थ्यादयोऽनुक्ता अपि लभ्यन्ते।

३ विकारो नाम,– विपरीतक्रिया। यथा–विकारसंज्ञया प्रकृतिरपि लभ्यते। प्रकृतिसंज्ञया च विकारः। तत्र विकारसंज्ञया च प्रकृतिर्यथा (हृ. सू. अ. ६।११४)– "पुष्पे पत्रे फले नाले कन्दे च गुरुता क्रमात्।" [इति] शाकमधिकृत्योक्तम्। अत्र प्रकृतिः पाठाशूका(षा)दीनां पत्रादीनि। तानि हि पाकेन विक्रियमाणानि चावस्थान्तरं प्रतिपद्यमानानि शाकसंज्ञां लभन्ते। तदयं शास्त्रकारस्तेषां विकारसंज्ञां, यवादिमण्डलादिसंज्ञया यवादिकं चोक्तवान्।

४ सामीप्यं नाम, ?

५ भूयस्त्वं नाम,–यदेकस्मिन् वर्तमानमाधिक्येन क्वचिल्लभ्यते। यथा तन्त्रे (च. सू. अ. २६।४२)–"अम्लो भक्तं रोचयति" इत्युक्तम्, न च मधुरादिरपि न रोचयतीति। कस्यचिच्चाम्लविद्वेषिणोऽम्लो रसो भक्तविद्वेषमेव कुर्यात्। तत्र भूयस्त्वमाश्रित्येदमुक्तम्–'अम्लो रोचयति।' कदाचिद् कस्यचिद्वा नासौ रोचयेन्न तावता तत्र रोचनम्।

६ प्रकारो नाम,–यो यस्य समानधर्मा स तस्य प्रकारः। यथा–"कण्ठमेरण्डनालेन स्पृशन् वमेत्।" इत्युक्तम्। न च तत्प्रकाराणां सुवर्चलाशतपुष्पादिनालानां न ग्रहणम्।

७ गुणगुणिविभवो नाम,–क्वचित् गुणीनि गुणशब्देनोक्तानि। यस्मादाह (हृ. शा. अ. ३।६०)–"पार्थिवाः पार्थिवानेव" इति। न हि पार्थिवा गुणाः सन्ति केचित्, ये पठ्येरन्। गुणश्च गुणिवद्यथा (हृ. उ. अ. ३९।२३)–"मेधास्मृतिबलोपेता बभूवुरमितायुषः।" इति। अत्रायुर्गुणोपेतममितत्वात्। नायुषः परिमाणगुण आयुर्गुणेनैव शक्यः।

८ संसक्तता नाम,–यदेकस्य बहुभिः सम्बन्धः। यथाविद्यमानेऽपि तत्रान्येषु सम्बन्धेषु तस्यैव व्यपदेशः क्रियते। यथा–मधुरस्कन्धनिर्देशेन माक्षिकादयो गुणिताः कषायादिरसोपेता अपि मधुरप्रायत्वान्मधुरसंसक्ततया।

९ तद्धर्मता नाम,–येन तथाभूतं सत्तद्धर्मतामासाद्य दर्शनात्तामेवाख्यां लभते। यथा (हृ. उ. अ. ४०।७६)–"विवर्जयेद्विषयपाशान् पाशान् वैवस्वतानिव।" इति। मारणधर्मो हि वैवस्वतपाशेन समानो दृष्ट इत्यतस्तेऽपि तथैवोक्ताः।

१० स्थानं नाम,–यत्र स्थानिना स्थानं स्थानेन वा स्थानी व्यपदिश्यते। तत्र स्थानिना स्थानं यथा–कर्णनादः श्रोत्ररोग इत्युक्तः। न च श्रोत्रेन्द्रियस्यास्ति नादः, किं तर्हि? तदधिष्ठानस्य कर्णस्य। तस्मादयं श्रोत्रेण स्थानिना कर्णमधिष्ठानमुक्तवान्। स्थानेन स्थानी यथा–जिह्वा रसं गृह्णाति। तत्र न जिह्वा रसं गृह्णाति, किं तर्हि? रसना।

११ तादर्थ्यं नाम,–यत्प्रयोजनार्थं प्रवर्तते यो भावस्तेनैव व्यपदिश्यते। यथा (हृ. सू. अ. १५।१)–"मदनमधुकलम्बा" इत्यादीनि छर्दनानि,–छर्दनप्रयोजनानीत्यर्थः।

१२ साहचर्यं नाम,–यो येन नित्यं सम्बन्ध उपलभ्यते, स तस्मात् सम्बन्धात्तमेव सम्बन्धिशब्दं लभते। यथा–'मथ्यमानाद् धूमं दृष्ट्वा ज्वलद्भासुरं वह्निद्रव्यमवश्यमभ्युत्थितो वह्निरित्येव।'

१३ कर्म नाम,–यत्र कर्मकर्मेति चोपचर्यते। यथोच्यते–"मुनयः प्रशमं जग्मुः।" न चाग्रामस्थानीयः कश्चित्प्रशमोऽस्ति। किं तर्हि?

इन्द्रियाणां विषयेभ्यः केवलं शक्तिनियमः प्रशमः। अथ च गतिः-कर्मविषयेभ्यस्त्विन्द्रियाणां क्रियानिवृत्तिः। तदेव च कर्मेत्युक्तम्।

१४ गुणनिमित्तं नाम-यत्कस्य विभूतिः प्रशंसादिका ख्याप्यते। "धर्म्यं यशस्यमायुष्यं लोकद्वयपरायणम् अनुमोदामहे ब्रह्मचर्यमेकान्तनिर्मलम्॥" (ह.उ.अ. ४०।४) इति ब्रह्मचर्यस्य होमे गुणाः, नाब्रह्मचर्यस्येति।

१५ चेष्टानिमित्तं नाम,-यस्मिन्नाममात्रं कस्यचित् क्रियया भवति भावस्य। नात्र प्रस्पन्दक्रियेष्टा। यथा- "दीपवदस्य ज्ञानं ज्वलति" इत्युच्यते। न च ज्ञानस्य प्रदीपस्येवार्चींषि सन्ति ऊर्ध्वगामीनि, दीपवद्वा सन्निकृष्टानि द्रव्यान्तराणि दहन्ति। रूपं वा स्पर्शं वा तैलादिकोपादानम्! किन्तु प्रकाशक्रियामात्रं परिगृह्य ज्वलतीति प्रशंसाकर्मणि क्रोधभयशोकलोभहर्षेर्ष्यामोहादिभिरुपहतं विज्ञानं मलोपहतदर्पणवदप्रकाशवृत्ति भवेत्।

१६ मूलसंज्ञा नाम,-या लोकेऽन्यस्मिन्नर्थे प्रसिद्धा तन्त्रे चान्यस्मिन् [अर्थे] निवेशिता। यथा (ह. नि. अ. १।२)- "निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा। सम्प्राप्तिश्च" इति। रूपं च लोके नीलपीतलोहितादि प्रसिद्धम्, स्वशास्त्रे संज्ञया तु रूपं-लिङ्गं लक्षणमिति।

१७ तात्स्थ्यं नाम,-यदन्यस्यैवार्थस्य तत्स्थत्वादन्यस्यैव कल्प्यते। तद्यथा (ह. नि. अ. १०।२३)-"बस्तिमेहनयोः शूलम्" इति। तत्र पुंसंस्थेन कारणेन बस्तिमेहनयोरिति कल्प्यते। चैतन्याभावे बस्तिमेहनयोः सतोरपि शूलाभावात् तत्प्रदेशस्थितत्वात्तयोरित्युपचर्यते।

तन्त्रदोषाः

१ अप्रसिद्धशब्दम्, २. दुःप्रणीतम्, ३ असङ्गतार्थम्, ४ असुखारोहि, ५ विरुद्धम्, ६. अतिविस्तृतम्, ७ अतिसंक्षिप्तम्, ८ अप्रयोजनम्, ९ भिन्नक्रमम्, १० संदिग्धम्, ११ पुनरुक्तम्, १२ निःप्रमाणकम्, १३ असमाप्तार्थम्, १४ अपा(न)र्थकम्, १५ व्याहतम्,

१ अप्रसिद्धशब्दं नाम,-यल्लोके नातीव प्रसिद्धम्। यथा- "उदक्यागमनरक्षणमसुखानाम्।" इति। यथा वा-"आधारस्यासिपाणिधारेष्वकुशलयोगता।" इति। अस्यार्थः- अकुनाम वृक्षः, तस्य शलमिति।

२ दुःप्रणीतं नाम,–सूत्रभाष्यप्रयोजनरहितम्।

३ असङ्गतार्थं नाम,–यत्सूत्रेणासम्बद्धम्।

४ असुखारोहि पदं नाम,–यत्पदसन्निवेशस्य विषमतया दुःखेनोच्चार्यते, चर्करीतादिप्रायम्। यथा–"धातर्यरिप्रदम्। इति।

५ विरुद्धं नाम,–यद् दृष्टान्तसिद्धान्तसमयैर्विरुद्धम्। यथा कश्चिद्वदेन्नित्यः पुरुषोऽकृतकत्वादिति हेतुः, घट इति दृष्टान्तविरुद्धम्। तथा–मधुराम्ललवणाः कफं शमयन्ति, कटुतिक्तकषाया वातं जयन्ति, इति वैद्यकसिद्धान्तविरुद्धमेतत्। समयविरुद्धं नाम,–यथा–यः समयः पूर्वाचार्यैस्तत्त्वदर्शिभिः कृतस्तं व्युत्क्रम्यागच्छति। यथा–"न लोष्टं विमृद्नीयात्, न तृणं छिन्द्यात्," इति। एतत् तत्त्वदर्शिभिरुक्तत्वाल्लोष्टमर्दनादि न क्रियते। न तु हेतुरत्रास्ति।

६ अतिविस्तृतं नाम,–यथा–मधुरादिस्कन्धं ब्रुवन् यावन्ति मधुराणि जगति सन्ति मधुरप्रायाणि मधुरप्रभवाणि तान्यशेषाणि यद्यभिदधाति, तदाऽतिविस्तृतत्वं स्यात्।

७ अतिसंक्षिप्तं नाम,–यथा–योगशतकप्रायम्। यथा वा–हेतुलिङ्गौषधोद्देश एव क्रियते, न तु तदवबोधकवाक्यानामिति शेषः।

८ अप्रयोजनं नाम,–यथा (छ. सू. अ. २।४८)– "इत्याचारः समासेन" इत्येतावद्यदि वदेत्, न तु ब्रूयात् "यं प्राप्नोति समाचरन्। आयुरारोग्यमैश्वर्यम्" इत्यादि, तदा न कश्चिदनुतिष्ठेदिति।

९ भिन्नक्रमं नाम,–पूर्वं येनानुक्रमेणोक्तं न तेनैव निर्दिश्यते प्रयोजनान्तरासम्भवेऽपि। यथा–वातपित्तकफानुद्दिश्य "तत्र रूक्षो लघुः" (छ. सू. अ. १।११) इत्यादौ वातगुणनिर्देशमकृत्वैव पित्तस्य विदधीत। एवं क्रमो भिन्नो भवेत्।

१० संदिग्धं नाम,–यथा–'किमकालमृत्युरस्ति उत नास्ति?' इत्युभयत्र हेत्वाभासपरिग्रहात् संशयः।

११ पुनरुक्तं नाम,–योऽर्थं उक्तोऽपि पुनरुच्यते।

१२ निःप्रमाणं नाम,–यथा (छ. चि. अ. १।४६)– "पाक्यं शीतकषायं वा मुस्तापर्पटकम्" इति।

१३ [असमासार्थं नाम,–] अत्र तावदुच्यते। परतोऽपि चेदित्येतत्ततः समासार्थत्वान्न ज्ञायते किमनेन कार्यमिति।

१५ व्याहतं नाम,–यथा–पूर्वया वाक्ययुक्त्याऽपरा व्याहन्यते, अपरया पूर्वा वा। यथा–"अनास्थाप्या मेहिनः" (हृ. सू. अ. १९।४) इत्युक्त्वा पुनरास्थापनमनुजज्ञे। मुस्तादेर्निर्यूहे पपाठ (हृ. क. अ. ४।४०)–"वातासृक्शोफमेहार्शोगुल्मविण्मूत्रसङ्ग्रहम्" इत्यादि। तदत्र विधिप्रतिषेधयोः परस्परविरोधाद्व्याहतत्वम्। अत्र समाधानार्थं विपुलमतय एवमभिदधुः,–प्रमेहिणमास्थाप्य निषेधाद् बस्तिकल्पे पुनरनुज्ञानात् तन्त्रकृतोऽभिप्रायविशेष ईदृगनुमीयते,–मेहिनो वातस्य प्रबलत्वेन बस्तिमन्तरेण नान्यस्तथाविध उपक्रमोऽस्ति, तस्मात्तस्यावस्थातुरवशाद्योज्यो बस्तिः। यदाऽऽर्तमेहिनो दृश्यते पवनस्याल्पत्वे(त्व), तदोपक्रमान्तरेणैव चिकित्सितुं शक्य इति, तदा बस्तिर्न योज्य इति प्रतिपादयितुमेवंविधो विन्यासः कृतः।

चरकसंहिता

सिद्धिस्थानम्—अध्यायः १२

तत्राधिकरणं योगो हेत्वर्थोऽर्थः पदस्य च ॥ ४१ ॥
प्रदेशोद्देशनिर्देशवाक्यशेषाः प्रयोजनम्।
उपदेशापदेशातिदेशार्थापत्तिनिर्णयाः ॥ ४२ ॥
प्रसङ्गैकान्तनैकान्ताः सापवर्गो विपर्ययः।
पूर्वपक्षविधानानुमतव्याख्यानसंशयाः ॥ ४३ ॥
अतीतानागतावेक्षास्वसंज्ञोह्यसमुच्चयाः।
निदर्शनं निर्वचनं संनियोगो विकल्पनम् ॥ ४४ ॥
प्रत्युत्सारस्तथोद्धारः सम्भवस्तन्त्रयुक्तयः।

चक्रपाणिदत्तः— तन्त्रयुक्तीरेवाह— तत्रेत्यादि। अधिकरणं नाम यमर्थमधिकृत्य प्रवर्तते कर्ता; यथा–"विघ्नभूता यदा रोगाः"

(सू. अ. १) इत्यादि । अत्र रोगादिकमधिकृत्यायुर्वेदो महर्षिभिः कृत इति 'रोगाः' इत्यधिकरणम् । योगो नाम योजना व्यस्तानां पदानामेकीकरणम् । उदाहरणं तावद्यथा–प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि; तत्र प्रतिज्ञा–मातृजश्चायं गर्भः, हेतुः–मातरमन्तरेण गर्भानुपपत्तेः, दृष्टान्तः–कूटागारः, उपनयः–यथा नानाद्रव्यसमुदायात् कूटागारस्तथा गर्भनिर्वर्तनं, तस्मान्मातृजश्चायमित्येषां प्रतिज्ञायोगः; एवमन्येऽपि योगार्था व्याख्येयाः । हेत्वर्थो नाम यदन्यत्राभिहितमन्यत्रोपपद्यते; यथा—"समानगुणाभ्यासो हि धातूनां वृद्धिकारणम" (सू. अ. १२) इति वातमधिकृत्योक्तं, तत्र वातस्येति वक्तव्ये यदयं समानशब्दं धातूनामिति करोति, तेन यथा वायोस्तथा रसादीनामपि समानगुणाभ्यासो वृद्धिकारणमिति गम्यते । पदार्थो नाम पदस्य पदयोः पदानां वाऽर्थः पदार्थः । तत्र द्रव्यमितिपदेन खादयश्चेतनाषष्ठा उच्यन्ते; पदयोरर्थो नाम यथा–'आयुषो वेद' इति पदयोरायुर्बोधकं तन्त्रमित्यर्थः, एवं पदानामप्यर्थ उदाहार्यः । प्रदेशो नाम यद्बहुत्वादर्थस्य कार्त्स्न्येनाभिधातुमशक्यमेकदेशेनाभिधीयते, यथा—"अनुपानैकदेशोऽयमुक्तः प्रायोपयोगिकः" (सू. अ. २७) इत्यादि । उद्देशो नाम संक्षेपाभिधानं; यथा–"हेतुलिङ्गौषधज्ञानं" (सू. अ. १), अनेन सर्वायुर्वेदाभिधेयोद्देशः । निर्देशो नाम संक्षेपोक्तस्य विवरणं; यथा–"हेतुलिङ्गौषधस्य पुनः प्रपञ्चनं "सर्वदा सर्वभावानां" इत्यादिना "इत्युक्तं कारणं', (सू. अ. १) इत्यन्तेन कारणप्रपञ्चनमित्यादि । वाक्यशेषो नाम यल्लाघवार्थमाचार्येण वाक्येषु पदमकृतं गम्यमानतया पूर्यते; यथा "प्रवृत्तिर्हेतुर्भावानां" (सू. अ. १६) इत्यत्र 'अस्ति' इति पदं "जाङ्गलजै रसैः" इत्यत्र मांसशब्दः पूर्यते । वाक्येषु चैत एव पदाः शेषाः क्रियन्ते, येऽनिवेशिता अपि प्रतीयन्ते । प्रयोजनं नाम यदर्थं कामयमानः प्रवर्तते; यथा–"धातुसाम्यक्रिया चोक्ता तन्त्रस्यास्य प्रयोजनम्" (सू. अ. १) । उपदेशो नामाप्तानुशासनं; यथा–"स्नेहमग्रे प्रयुञ्जीत ततः स्वेदमनन्तरम्" (सू. अ. १३) इत्यादि । अपदेशो नाम यत्प्रतिज्ञातार्थसाधनाय हेतुवचनं; यथा–"वाताज्जलं जलाद्देशं देशात् कालं स्वभावतः । विद्याद्दुष्परिहार्यत्वात्" (वि. अ. ३) इत्यादि, तत्र प्रतिज्ञातार्थस्य हेतुवचनं–दुष्परिहार्यत्वादिति । अतिदेशो नाम यत्किंचिदेव प्रकाश्यार्थमनुक्तार्थसाधनार्थेव एवमन्यदपि प्रत्येतव्यमिति परिभाष्यते; यथा–"यच्चान्यदपि किंचित् स्यादनुक्तमिह

पूजितम्। वृत्तं तदपिचात्रेयः सदैवाभ्यनुमन्यते" (सू. अ. ८) इति। अर्थापत्तिर्नाम यदकीर्तितमर्थादापद्यते साऽर्थापत्तिः यथा-नक्तं दधिभोजननिषेधः, अर्थाद्दिवा भुञ्जीतेत्यापद्यते। निर्णयो नाम विचारितस्यार्थस्य व्यवस्थापनं; यथा-चतुष्पदभेषजत्वादि विचारं कृत्वाऽभिधीयते-"यदुक्तं षोडशकलं पूर्वाध्याये भेषजं तद्युक्तियुक्तमलमारोग्याय" (सू. अ. १०) इति। इति प्रसंगो नाम पूर्वाभिहितस्यार्थस्य प्रकरणागतत्वादिना पुनरभिधानं; यथा-"तत्रातिप्रभावतां दृश्यानातिमात्रदर्शनमतियोगः" (सू. अ. ११) एवमाद्यभिधाय, पुनः "अत्युग्रशब्दश्रवणाच्छ्रवणात् सर्वशो न च" (शा. अ. १) इत्यादिना पूर्वोक्त एवार्थोऽभिधीयते। एकान्तो नाम यदवधारणेनोच्यते; यथा-निजः शरीरदोषोत्थः, त्रिवृद्विरेचयतीत्यादि। अनैकान्तो नाम अन्यतरपक्षानवधारणं; यथा-"ये ह्यातुराः केवलाद्भेषजादृते म्रियन्ते, न च ते सर्वे एव भेषजोपपन्नाः समुत्तिष्ठेरन्" (सू. अ. १०) इत्यादि। अपवर्गो नाम साकल्येनोद्दिष्टस्यैकदेशापकर्षणं; यथा "न पर्युषितान्नमाददीतान्यत्र मांसहरितकशुष्क शाकफलभक्ष्येभ्यः" (सू. अ. ८) इति। अत्र हि सामान्येन पर्युषितभक्षणनिषेधं कृत्वा मांसादेः पर्युषितस्यापि भक्षणमपकृष्य विधीयते। विपर्ययो नाम अपकृष्टात् प्रतीपोदाहरणं; यथा-"निदानोक्तान्यस्य नोपशेरते विपरीतानि चोपशेरते" (नि. अ. ३) इति। पूर्वपक्षो नाम प्रतिज्ञातार्थसंदूषकं वाक्यं; यथा- "मत्स्यान्न पयसाऽभ्यवहरेत्" इति प्रतिज्ञातस्यार्थस्य "सर्वानेव मत्स्यान्नं पयसाऽभ्यवहरेदन्यत्र चिलिचिमात्" (सू. अ. २६) इति। विधानं नाम सूत्रकारश्च विधाय वर्णयति; यथा-"मलायनानि बाध्यन्ते दुष्टैर्मात्राधिकैर्मलैः" इत्यत्र दुष्टिशब्देन मलानां हीनत्वमधिकत्वमाचार्यगृहीतमाचार्यो वर्णयति- "मलवृद्धि गुरुतया लाघवान्मलसंक्षयम्। मलायनानां बुध्येत संगोत्सर्गादतीव च" (सू. अ.७) इति; केचित्तु प्रकरणानुपूर्व्याऽर्थाभिधानं विधानमाहुः, यथा-रसरुधिरमांसमेदोऽस्थिमज्जशुक्राणामुत्पादक्रमानुरोधेनाभिधानम्। अनुमतं नाम एकीयमतस्यानिवारणेनानुमननं; यथा-"गर्भशल्यस्य जरायुःप्रपातनं कर्म संशमनमित्येके" (शा. अ. ८) इत्यत्रैकीयमतं प्रतिपाद्याप्रतिषेधादनुमन्यते। व्याख्यानं नाम यत् सर्वेबुद्ध्यविषयं व्याक्रियते, यथा-"प्रथमे मासि संमूर्छितः सर्वधातुकलुषीकृतः खेटभूतो भवत्यव्यक्तविग्रहः"

(शा. अ. ४) इत्यादिनाऽस्मदाद्यविदितार्थव्याकरणम्। संशयो नाम विशेषाकांक्षानिर्धारितोभयविषयज्ञानं; यथा—"मातरं पितरं चैके मन्यन्ते जन्मकारणम्। स्वभावं परनिर्माणं यदृच्छां चापरे जनाः" (सू. अ. ११) इत्यादिनोक्तः संशयः। अतीतावेक्षणं नाम यदतीतमेवोच्यते; यथा—"सा कुटी तच्च शयनं ज्वरं संशमयत्यपि" (चि.अ.३) इत्यत्र स्वेदाध्यायविहितकुट्यादिकमतीतमवेक्षते। अनागतावेक्षणं नाम यदनागतं विधिं प्रमाणीकृत्यार्थसाधनं; यथा—"अथवा तिक्तसर्पिषः" इत्याद्यनागतावेक्षणेनोच्यते। स्वसंज्ञा नाम या तन्त्रकारैर्व्यवहारार्थं संज्ञा क्रियते; यथा—जेन्ताकहोलाकादिका संज्ञा। ऊह्यं नाम यदनिबद्धं ग्रन्थे प्रज्ञया तर्कयित्वेनोपदिश्यते; यथा—"परिसंख्यातमपि यद्यद्द्रव्यमयौगिकं मन्येत तत्तदपकर्षयेत्" (वि. अ. ८) इति। समुच्चयो नाम यदिदं चेद चेति कृत्वा विधीयते; यथा—"वर्णश्च स्वरश्च" (इं. अ. १) इत्यादि। निदर्शनं नाम—मूर्खविदुषां बुद्धिसाम्यविषयो दृष्टान्तः; यथा—विज्ञातममृतं यथा" (सू. अ. १) इत्यादि। निर्वचनं नाम पण्डितबुद्धिगम्यो दृष्टान्तः; यथा—"ज्ञायते नित्यगस्येव कालस्यात्ययकारणम्" ((सू. अ. १६) इति। निदर्शननिर्वचनयोरयं विशेषः—यन्निदर्शनं मूर्खविदुषां बुद्धिसामान्यविषयं, निर्वचनं तु पण्डितबुद्धिवेद्यमेव; किंवा निर्वचनं निरुक्तिः—यथा—"विविधं सर्पति यतो विसर्पस्तेन संज्ञितः" (चि. अ. २१) इत्यादि। नियोगो नाम अवश्यानुष्ठेयतया विधानं; यथा—"न त्वया स्वेदमूर्च्छापरीतेनापि पिण्डिकैषा विमोक्तव्या" (सू. अ. १४) इत्यादि। विकल्पः पाक्षिकाभिधानं; यथा—"सारोदकं वाऽथ कुशोदकं वा" (चि. अ. ६) इत्यादि। प्रत्युत्सारो नाम उपपत्त्या परमतनिवारणं; यथा वार्योविदः प्राह—"रसजानि तु भूतानि रसजा व्याधयः स्मृताः" (सू. अ. २५) इत्यादि, हिरण्याक्षो निषेधयति—"न ह्यात्मा रसजः स्मृतः" इत्यादि। उद्धारो नाम परपक्षदूषणं कृत्वा स्वपक्षोद्धरणं; यथा— "येषामेव हि भावानां विरुद्ध्याधीनुदीरयेत्" (सू.अ.२५) इत्यादिना स्वपक्षोद्धरणम्। संभवो नाम यद्यस्मिन्नुपपद्यते स तस्य सम्भवः; यथा—" मुखे पिप्लुव्यङ्गनीलिकादयः सम्भवन्तीत्यादि। इत्येताः षट्त्रिंशत्तन्त्रयुक्तयो व्याहृताः। भट्टारहरिचन्द्रेण त्वन्याश्चतस्रस्तन्त्रयुक्तयः परिप्रश्न-व्याकरण-व्युत्क्रान्ताभिधान-हेत्वाख्या व्याहृताः; ताश्च तन्त्रोऽपठितत्वादेतास्वेवान्तर्भावनीयाः। तत्र परिप्रश्न उद्देशेऽन्तर्भवति, व्याकरणं तु व्याख्याने,

व्युत्क्रान्ताभिधानं निर्देशप्रभेदः, हेतुशब्देन यानि प्रत्यक्षादीनि प्रमाणान्युक्तानि तानि हेतावन्तर्भवन्ति । व्याख्या पञ्चदश प्रकारा, सप्तविधा कल्पना, एकविंशतिरर्थाश्रयाः, सप्तदश ताच्छील्यानि, चतुर्दश च तन्त्रदोषा भवन्ति, तदुत्तरतन्त्रे प्रतिपादितत्वान्नेह विलिखिता आचार्येण (?) ॥ ४१-४४ ॥

तन्त्रे समासव्यासोक्ते भवन्त्येता हि कृत्स्नशः ॥ ४५ ॥
एकदेशेन दृश्यन्ते समासाभिहिते तथा ।

संप्रति तन्त्रयुक्तीरुद्दिश्य तासां तन्त्रे एवानुसरणमाह—तन्त्रे समासव्यासोक्ते इत्यादि । समासाभिहिते इत्यनेन अतिसंक्षिप्ते तन्त्रे नावश्यं सर्वास्तन्त्रयुक्तयो भवन्तीति दर्शयति; किंवा समासाभिहिते एकदेशेन दृश्यन्ते इति सम्बन्धः ॥ ४५ ॥

यथाऽम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा ॥ ४६ ॥
प्रबोधनप्रकाशार्थास्तथा तन्त्रस्य युक्तयः ।

तन्त्रयुक्तीनां कार्यं दृष्टान्तेन दर्शयन्नाह—यथेत्यादि । यथाऽम्बुजवनस्य संकुचितस्य विस्तारकोऽर्कस्तथा तन्त्रे संकुचितस्यार्थप्रदेशस्य विस्तारकास्तन्त्रयुक्तयः; प्रबोधनाद्विस्तारका भवन्तीत्यर्कदृष्टान्तेन दर्शयति; दीपदृष्टान्तेन तु यथा दीपः संतमेव तमसा पिहितं प्रकाशयति तथा हेत्वादिकास्तन्त्रयुक्तयः संतमर्थं गूढं प्रकाशयन्तीति दर्शयति । एतदेवार्थद्वयं तन्त्रयुक्तीनां संपाद्यमभिप्रेत्योक्तं—प्रबोधनप्रकाशार्था इति ॥ ४६ ॥

एकस्मिन्नपि यस्येह शास्त्रे लब्धास्पदा मतिः ॥ ४७ ॥
स शास्त्रमन्यदप्याशु युक्तिज्ञत्वात् प्रबुध्यते ।
अधीयानोऽपि शास्त्राणि तन्त्रयुक्त्या विना भिषक्
नाधिगच्छति शास्त्रार्थानर्थान् भाग्यक्षये यथा ॥ ४८ ॥

सम्यक्शास्त्राभ्यासफलमाह—एकस्मिन्नपीत्यादि ॥ ४७ ॥ ४८ ॥

दुर्गृहीतं क्षिणोत्येव शास्त्रं शस्त्रमिवाबुधम् ।
सुगृहीत तदेवाज्ञं शास्त्रं शस्त्रं च रक्षति ॥ ४९ ॥

(तस्मादेताः प्रवक्ष्यन्ते विस्तरेणोत्तरे पुनः ।
तत्त्वज्ञानार्थमस्यैव तन्त्रस्य गुणदोषतः ॥ ५० ॥

शास्त्रे दुर्ज्ञानसम्यक्ज्ञानयोर्दोषगुणानाह—दुर्गृहीतमित्यादि । दुर्गृहीतं शास्त्रं यथाऽऽत्मन एव करच्छेदादिकमापादयति, तथा दुर्गृहीतं शास्त्रं मिथ्याभेषजप्रयोगादात्मनोऽपि व्यापदमावहति; यथा वा शस्त्रं सुगृहीतं तस्करादिभ्यो रक्षां करोति, तथा सुगृहीतं शास्त्रमात्मन आतुरस्य च रक्षामापादयतीति । तस्मादेता इत्यादिकं श्लोकमुत्तरे तन्त्रे तन्त्रयुक्तिव्याकरणे प्रतिपादकं पठन्ति, तं चानार्षं वृद्धा वदन्ति, अग्निवेशतन्त्रे उत्तरतन्त्रस्यैवानार्षत्वात् ॥ ४९ ॥ ५० ॥

सुश्रुतसंहिता

पञ्चषष्टितमोऽध्यायः (६५) ।

अथातस्तन्त्रयुक्तिमध्यायं व्याख्यास्यामः ॥ १ ॥
यथोवाच भगवान् धन्वन्तरिः ॥ २ ॥

डल्हणः :— स्वस्थवृत्तानन्तरं स्वस्थविध्यर्थस्य तन्त्रयुक्तिभिः प्रसाधनात्तन्त्रयुक्त्यध्यायारम्भः—अथात इत्यादि । अथात इति पूर्ववत् व्याख्येयम् । त्रायते शरीरमनेनेति तन्त्रं शास्त्रं चिकित्सा च, तस्य युक्तयो योजनास्तन्त्रयुक्तयः, ता अधिकृत्य कृतोऽध्यायः, तम् । वेदोत्पत्तिवदत्र तद्धितलोपः । ताश्च तन्त्रयोजना द्विविधाः—वाक्ययोजनाः अर्थयोजनाश्च । तत्र वाक्ययोजना योगोद्देशनिर्देशाद्याः, अर्थयोजना अधिकरणपदार्थादयः ॥ १ ॥ २ ॥

द्वात्रिंशत्तन्त्रयुक्तयो भवन्ति शास्त्रे । तद्यथा—अधिकरणं १, योगः २, पदार्थः ३, हेत्वर्थः ४, उद्देशः ५, निर्देशः ६, उपदेशः ७, अपदेशः ८, प्रदेशः ९, अतिदेशः १०, अपवर्जः

११, वाक्यशेषः १२, अर्थापत्तिः १३, विपर्ययः १४, प्रसङ्गः १५, एकान्तः १६, अनेकान्तः १७, पूर्वपक्षः १८, निर्णयः १९, अनुमतं २०, विधानम् २१, अनागतावेक्षणम् २२, अतिक्रान्तावेक्षणम् २३, संशयः २४, व्याख्यानं २५, स्वसंज्ञा २६, निर्वचनं २७, निदर्शनं २८, नियोगः २९, विकल्पः ३०, समुच्चयः ३१, ऊह्यम् ३२, इति ॥ ३ ॥

संख्याभेदेन तन्त्रयुक्तीर्निर्दिशन्नाह—द्वात्रिंशदित्यादि। शास्त्रे सौश्रुते। अधिकरणमित्यादिसंख्येयनिर्देशादेव द्वात्रिंशत् संख्या लब्धा, अतस्तत्करणमन्यतन्त्रोक्ताः षट्त्रिंशच्चत्वारिंशद्वा तन्त्रयुक्तय इति संख्यानिषेधार्थम्। शास्त्रे इत्यत्रान्ये समासेनेति पठित्वा व्याख्यानयन्ति—अन्यत्र विस्तरेण षट्त्रिंशच्चत्वारिंशद्वा तन्त्रयुक्तयः, अत्र द्वात्रिंशदिति समासेनोक्तम्। कतमास्तास्तन्त्रयुक्तय इत्याह—तद्यथेत्यादि। तद्यथेति निदर्शनम्। अधिकरणादीनि सूत्रकार एव व्याख्यास्यति ॥ ३ ॥

अत्रासां तन्त्रयुक्तीनां किं प्रयोजनम्? उच्यते—वाक्ययोजनमर्थयोजनं च ॥ ४ ॥

एवं तन्त्रयुक्तीरुद्देशतः प्रतिपाद्य तासां तन्त्रयुक्तीनां प्रयोजनमाह—अत्रासामित्यादि। अत्र चिकित्साशास्त्रे। वाक्ययोजनमर्थयोजनं चेति वाक्यस्यासंबद्धस्य योजनं संबन्धनं वाक्ययोजनं, लीनस्यासङ्गतस्य चार्थस्य प्रकाशनं सङ्गतीकरणं चार्थयोजनम्। तत्र कासांचित्तन्त्रयुक्तीनां योगोद्देशनिर्देशादीनां वाक्ययोजनं, कासाञ्चिदधिकरणपदार्थोह्यादीनामर्थयोजनं प्रयोजनम् ॥ ४ ॥

भवन्ति चात्र श्लोकाः—

असद्वादिप्रयुक्तानां वाक्यानां प्रतिषेधनम् ॥
स्ववाक्यसिद्धिरपि च क्रियते तन्त्रयुक्तितः ॥ ५ ॥
व्यक्ता नोक्तास्तु ये ह्यर्था लीना ये चाप्यनिर्मलाः ॥
लेशोक्ता ये च केचित्स्युस्तेषां चापि प्रसाधनम् ॥ ६ ॥

अत्रैव पूर्वाचार्यपठितौ श्लोकावधिकार्थख्यापनायाह—असद्वादिप्रयुक्तानामित्यादि। असद्वादिनो हि प्रतिरसपाकवादिनः पाकत्रयवादिनो गुणकर्तृत्ववादिनो वेत्यादयः। प्रतिषेधनम् अपदेशादिभिस्तन्त्रयुक्तिभिः परपक्षदूषणम्। स्ववाक्यसिद्धिः स्ववाक्यस्थापनं निर्णयाख्यया तन्त्रयुक्त्या। यथा—प्रतिरसं पाक इत्यसद्वादिदर्शनमपदेशाख्यया तन्त्रयुक्त्या द्रव्यादिविज्ञाने निराकृतं, तत्रैव द्विविधः पाक इत्यादिस्वमतसाधनं निर्णयाख्यया तन्त्रयुक्त्या कृतम्। व्यक्ता नोक्ताः स्पष्टतया नोक्ताः। लीना अलभ्यप्रदर्शिताः। अनिर्मला लेशेनोक्ताः। तेषां प्रसाधनं योगप्रभृतिभिः क्रियते ॥ ५ ॥ ६ ॥

यथाऽम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा ॥
प्रबोधस्य प्रकाशार्थं तथा तन्त्रस्य युक्तयः ॥ ७ ॥

केचिदत्र तन्त्रयुक्तीनां स्तुत्यर्थं श्लोकं पठन्ति—यथाऽम्बुजवनस्यार्क इत्यादि। एष च श्लोकष्टीकासु मूलत्वेन न वर्णितः ॥ ७ ॥

तत्र यमर्थमधिकृत्योच्यते तदधिकरणं; यथा—रसं दोषं वा ॥ ८ ॥

अतः परमुद्दिष्टानां तन्त्रयुक्तीनां विवरणमाह—तत्रेत्यादि। तत्र तासु तन्त्रयुक्तिषु मध्ये; यमर्थम् अधिकृत्य अपरे अर्था अभिधीयन्ते तदधिकरणसंज्ञं भवति उदाहरणमाह—रसं दोषं वेति। एतेनैतदुक्तं भवति—रसं दोषं वा अधिकृत्य यत्तदुल्लेखाभावेऽप्यर्थजातमभिहितं तत् सर्वं तदधिकारे प्रतीयत इत्यर्थः ॥ ८ ॥

येन वाक्यं युज्यते स योगः। यथा—
'तैलं पिबेच्चामृतवल्लिनिम्ब-
हिंस्राभयावृक्षकपिप्पलीभिः ॥
सिद्धं बलाभ्यां च सदेवदारु
हिताय नित्यं गलगण्डरोगे' ॥

इत्यत्र तैलं सिद्धं पिबेदिति प्रथमं वक्तव्ये तृतीयपादे सिद्धमिति प्रयुक्तं, एवं दूरस्थानामपि पदानामेकीकरणं योगः ॥ ९ ॥

योगाख्यां तन्त्रयुक्तिमाह—तेनेत्यादि। येन व्यत्यासोक्तानां सन्निकृष्टविप्रकृष्टानां पदानामेकीकरणं स योग इत्यर्थः। व्यत्यासेनोक्तं पदयोगं दर्शयन्नाह—तैलमित्यादि। विपर्ययेणोक्तस्य पदस्यैकीकरणं योग इत्यर्थः। येनेत्यादि सूत्रं, येन व्यत्यासोक्तानां इत्यादिसूत्रार्थः, यथेत्याद्युदाहरणम्। एवं सन्निकृष्टस्य विपर्ययोक्तस्य पदस्यापहरणं मुख्यमेकीकरणं प्रतिपाद्य दूरस्थानामप्युद्देशेनाह—एवं दूरस्थानामपीति ॥ ९ ॥

योऽर्थोऽभिहितः सूत्रे पदे वा स पदार्थः, पदस्य पदयोः पदानां वाऽर्थः पदार्थः; अपरिमिताश्च पदार्थाः। यथा—स्नेहस्वेदाञ्जनेषु निर्दिष्टेषु द्वयोस्त्रयाणां वाऽर्थानामुपपत्तिर्दृश्यते, तत्र योऽर्थः पूर्वापरयोगसिद्धो भवति स ग्रहीतव्यः; यथा—'वेदोत्पत्तिमध्यायं व्याख्यास्याम' इत्युक्ते सन्दिह्यते बुद्धिः—कतमस्य वेदस्योत्पत्तिं वक्ष्यतीति, यतः ऋग्वेदादयस्तु वेदाः: 'विद विचारणे, विद्‌लृ लाभे', इत्येतयोश्च धात्वोरनेकार्थयोः प्रयोगात्, तत्र पूर्वापरयोगमुपलभ्य प्रतिपत्तिर्भवति–आयुर्वेदोत्पत्तिमयं विवक्षुरिति; एष पदार्थः ॥१०॥

पदार्थाभिधां तन्त्रयुक्तिमाह—योऽर्थोऽभिहित इत्यादि। पद्यते गम्यते येनार्थ इति सूत्रस्यापि पदत्वात् सूत्रे योऽर्थः प्रतिपादितः स पदार्थः। पदार्थाख्यतन्त्रयुक्तिप्रतिपादकं लक्षणमभिधायेदानीं तद्व्याख्यातुकामः प्रथमं तदवयवस्य समासमभिधत्ते–पदस्येत्यादि। अधुना बहुषु पदार्थेषु निर्धार्य विशिष्टपदार्थग्रहणाय पदार्थबहुत्वं प्रतिपादयति—अपरिमिता इत्यादि। कथमित्याह-यथेत्यादि। तत्र स्नेहशब्दे निर्दिष्टे हि गुणप्रेमसर्पिषां त्रयाणामर्थानामुपपत्तिर्दृश्यते, स्वेदशब्देनापि साग्निनिरग्निकयोरूष्मणोः प्राप्तिः, अञ्जनशब्देनापि नयनाञ्जनाभ्यङ्गयोः प्राप्तिः, तेषु पदार्थेषु यादृशः पदार्थो गृह्यते तादृशमाह—तत्र योऽर्थ इत्यादि। पूर्वोक्तपरोक्तवाक्यसंबन्धेनोपपन्नो योऽर्थो भवति स ग्रहीतव्य इत्यर्थः। उदाहरणमाह--यथा वेदोत्पत्तिमित्यादि। सन्दिह्यते सन्देहं गच्छतीत्यर्थः। कथं सन्दिह्यत इत्याह—कतमस्येत्यादि। यतः

ऋग्वेदादयो वेदास्ततः कतमस्य वेदस्योत्पत्तिं वक्ष्यतीति सन्दिह्यते, तस्मिन् सन्देहे यथा प्रत्ययार्थः स्वीकर्तव्यस्तथाऽऽह—त्रिदित्यादि—'आयुर्वेद-मिच्छाम इहोपदिश्यमानम्' इत्यस्मिन्नायुर्वेदशब्दः श्रूयते, अतोऽत्र वेद आयुर्वेद इत्यभिप्रायः ॥ १० ॥

यदन्यदुक्तमन्यार्थसाधकं भवति स हेत्वर्थः। यथा—मृत्पिण्डोऽद्भिः प्रक्लिद्यते तथा माषदुग्धप्रभृतिभिर्व्रणः प्रक्लि-द्यत इति ॥ ११ ॥

हेत्वर्थतन्त्रयुक्तेर्लक्षणमाह—यदन्यदित्यादि। उदाहरणमाह—यथा मृदित्यादि। अत्र बाह्येन मृत्पिण्डदृष्टान्तेन माषदुग्धयोगादिभिरा-भ्यन्तरो व्रणप्रक्लेदः साध्यते ॥ ११ ॥

समासवचनमुद्देशः। यथा—शल्यमिति ॥ १२ ॥

उद्देशलक्षणमाह—समासेत्यादि। संक्षेपेण भणनमुद्देश इत्यर्थः। उदाहरणमाह—यथा शल्यमिति। सर्वमेवाबाधजननं संक्षेपेण शल्य-मुच्यते, नतु शारीरागन्तुभेदेन प्रपञ्चनात् ॥ १२ ॥

विस्तरवचनं निर्देशः। यथा-शारीरमागन्तुकं चेति॥ १३॥

निर्देशलक्षणमाह—विस्तरेत्यादि। विस्तरेण भाषणं निर्देश इत्यर्थः। उदाहरणमाह—यथा शारीरमागन्तुकं चेति। शारीरं शल्य-मागन्तुकं च शल्यमिति शल्यं द्विविधमुच्यते ॥ १३ ॥

एवमित्युपदेशः। यथा—'तथा न जागृयाद्रात्रौ दिवा-स्वप्नं च वर्जयेत्' इति ॥ १४ ॥

उपदेशलक्षणमाह—एवमित्यादि। एवं कुर्यादित्युपदेश इत्यर्थः। उदाहरणमाह—यथेत्यादि। ननु, उपदेशनियोगयोः को भेदः? उच्यते, प्रायिक उपदेशः, यथा रात्रौ न जागृयादिति प्रायिकत्वेनोपन्यस्तं, कफा-द्यभिभूते तु तत्र रात्रिजागरणस्यापि शस्तत्वात्; दिवा न स्वापं कुर्यादि-त्यपि प्रायिकं, ग्रीष्मे तृष्णाद्यन्वये च दिवास्वापस्योचितत्वात्; नियोग-श्चाप्रायिकः, यथा—पथ्यमेव भोक्तव्यमिति; यद्यपि 'ज्वरितोऽहितमश्नी-याद्यद्यप्यस्यारुचिर्भवेत्' इत्यादिनाऽपथ्यभोजनस्याप्यवकाशः, तथाऽपि तदानीमपथ्यस्यैव पथ्यत्वमिति नियोगस्य व्यभिचारो नास्ति ॥ १४ ॥

अनेन कारणेनेत्यपदेशः, यथाऽपदिश्यते— मधुरः श्लेष्माणमभिवर्धयतीति ॥ १५ ॥

अपदेशलक्षणमाह—अनेनेत्यादि । अनेन कारणेनेति कार्यं प्रति हेतुकथनमपदेश इत्यर्थः । उदाहरणमाह—यथापदिश्यत इत्यादि । यथापदिश्यत इति उदाहरणोपक्रमे । द्रव्यविशेषो मधुरः कुतः श्लेष्माणं वर्धयति ? अत्र मधुरः श्लेष्माणं वर्धयति अर्थान्निजभावेन मधुरत्वेन वर्धयति ॥ १५ ॥

प्रकृतस्यातिक्रान्तेन साधनं प्रदेशः । यथा—देवदत्तस्यानेन शल्यमुद्धृतं तथा यज्ञदत्तस्याप्ययमुद्धरिष्यतीति । ॥ १६ ॥

प्रदेशमाह—प्रकृतस्येत्यादि । उदाहरणमाह—यथा देवदत्तस्येत्यादि । अत्र यज्ञदत्तस्य शल्योद्धरणं प्रस्तुतं, तद्देवदत्तस्य शल्योद्धरणेनातिक्रान्तेन साध्यते ॥ १६ ॥

प्रकृतस्यानागतस्य साधनमतिदेशः । यथा—यतोऽस्य वायुरूर्ध्वमुत्तिष्ठते तेनोदावर्ती स्यादिति ॥ १७ ॥

अतिदेशमाह—प्रकृतस्येत्यादि । अनागतस्य भविष्यतः । उदाहरणमाह—यथा यत इत्यादि । अत्र वायोरूर्ध्वमुत्थानं प्रकृतम् । तेन प्रस्तुतेन अनागतं भविष्यदुदावर्तित्वं साध्यते । उदावर्ती संभाव्येत । ॥ १७ ॥

अभिव्याप्याकर्षणमपवर्गः । यथा—अस्वेद्या विषोपसृष्टाः, अन्यत्र कीटविषादिति ॥ १८ ॥

अपवर्गमाह—अभिव्याप्येत्यादि । (गुणक्रियादिभिः सर्वतो वा अभिव्याप्य कस्यचित् पदार्थस्य तेभ्यो गुणक्रियादिभ्यः पृथक्करणम् अपवर्गः) । उदाहरणमाह—यथा अस्वेद्या इत्यादि । उत्सर्गरूपतया विषोपसृष्टानस्वेद्यान् प्रतिपाद्यापवादमाह—अन्यत्रेत्यादि ॥ १८ ॥

येन पदेनानुक्तेन वाक्यं समाप्येत स वाक्यशेषः । यथा—शिरःपाणिपादपार्श्वपृष्ठोदरोरसामित्युक्ते पुरुषग्रहणं विनाऽपि गम्यते पुरुषस्येति ॥ १९ ॥

वाक्यशेषमाह—येनेत्यादि । उदाहरणमाह—यथा शिर इत्यादि । गम्यते ज्ञायत इत्यर्थः ॥ २० ॥

यदकीर्तितमर्थादापद्यते साऽर्थापत्तिः । यथा — ओदनं भोक्ष्ये इत्युक्तेऽर्थादापन्नं भवति—नायं पिपासुर्यवागूमिति ॥ २० ॥

अर्थापत्तिमाह—यदकीर्तितमित्यादि । अकीर्तितम् अप्रतिपादितम् । तदुदाहरणमाह—यथौदनमित्यादि । नायं पातुमिच्छुर्यवागूमित्यर्थः ॥ २० ॥

यद्यत्राभिहितं तस्य प्रातिलोम्यं विपर्ययः । यथा — कृशाल्पप्राणभीरवो दुश्चिकित्स्या इत्युक्ते विपरीतं गृह्यते दृढादयः सुचिकित्स्या इति ॥ २१ ॥

विपर्ययमाह—यद्यत्राभिहितमित्यादि । प्रातिलोम्यं विपरीतम् । उदाहरणमाह—यथा कृशाल्पेत्यादि । विपर्ययेण विपरीतमेव गम्यते, अर्थापत्त्या अविपरीत एवार्थः प्रतीयत इत्यनयोर्भेदः ॥ २१ ॥

प्रकरणान्तरेण समापनं प्रसंगः, यद्वा प्रकरणान्तरितो योऽर्थोऽसकृदुक्तः समाप्यते स प्रसङ्गः । यथा—पञ्चमहाभूतशरीरिसमवायः पुरुषस्तस्मिन् क्रिया सोऽधिष्ठानमिति वेदोत्पत्तावभिधाय, भूतचिन्तायां पुनरुक्तं-यतोऽभिहितं पञ्चमहाभूतशरीरिसमवायः पुरुष इति, स खल्वेष कर्मपुरुषश्चिकित्साधिकृत इति ॥ २२ ॥

प्रसङ्गमाह—प्रकरणान्तरेणेत्यादि । प्रकरणान्तरेणेति प्रकरणान्तरोक्तेनार्थेनेत्यर्थः । समानं तुल्यम् । उदाहरणमाह—यथेत्यादि । प्रकरणान्तरेषु असकृदुक्तः पुनः पुनरुक्तः । समाप्यते समाप्तिं नीयते । तदेव कथ्यते—यथेत्यादि । अपरे तु 'अधिकरणान्तरितो योऽर्थोऽसकृदुक्त' इति पठित्वा व्याख्यानयन्ति—स्नेहविरेकाधिकारयोर्नवज्वरी निषिद्धः, पुनर्ज्वराधिकारे तरुणज्वरिणः स्नेहशोधने निषिद्धे इति अधिकरणेऽन्तरितस्यार्थस्यासकृदुक्तिः ॥ २२ ॥

(सर्वत्र)यदवधारणेनोच्यते स एकान्तः। यथा—त्रिवृद्विरेचयति, मदनफलं वामयति (एव) ॥ २३ ॥

एकान्तलक्षणमाह—सर्वत्रेत्यादि। अवधारणेन अविकल्पेन, नियमेनेत्यर्थः; उदाहरणेऽवधारणवाचिन एवकारस्य निर्देशात्। उदाहरणमाह—यथा त्रिवृद्विरेचयतीति ॥ २३ ॥

क्वचित्तथा क्वचिदन्यथेति यः सोऽनेकान्तः। यथा—केचिदाचार्या ब्रुवते द्रव्यं प्रधानं, केचिद्रसं, केचिद्वीर्यं, केचिद्विपाकमिति ॥ २४ ॥

अनेकान्तमाह—क्वचित्तथेत्यादि। उदाहरणमाह—यथा केचिदाचार्या ब्रुवते द्रव्यं प्रधानमित्यादि। स्पष्टार्थः ॥ २४ ॥

आक्षेपपूर्वकः प्रश्नः पूर्वपक्षः। यथा—कथं वातनिमित्ताश्चत्वारः प्रमेहा असाध्या भवन्तीति ॥ २५ ॥

पूर्वपक्षमाह—आक्षेपेत्यादि। उदाहरणमाह—यथेत्यादि। अत्रैव दोषजानां साध्यत्वेनोपलब्धेरिति हेतोः पूर्वपक्षावतारः। निर्णयाङ्गत्वेनार्थसाधनत्वमेव संशयस्यापि ॥ २५ ॥

तस्योत्तरं निर्णयः। यथा शरीरं प्रपीड्य पश्चादधो गत्वा वसामेदोमज्जानुविद्धं मूत्रं विसृजति वातः, एवमसाध्या वातजा इति ॥ २६ ॥

तथा चोक्तम्—

कृत्स्नं शरीरं निष्पीड्य मेदोमज्जावसायुतः।
अधः प्रकुप्यते वायुस्तेनासाध्यास्तु वातजाः ॥ २७ ॥

निर्णयमाह—तस्योत्तरमित्यदि। तस्य पूर्वपक्षस्य यदुत्तरं स निर्णय इत्यर्थः। उदाहरणमाह—यथा शरीरमित्यादि। यतः शरीरपीडादिकं कृत्वा वसाद्यन्वितं मूत्रं वातो विसृजति, अतो मज्जाक्षये पूर्वपूर्वधातुक्षयादसाध्यत्वमित्यर्थः ॥ २६ ॥ २७ ॥

परमतमप्रतिषिद्धमनुमतम्। यथा—अन्यो ब्रूयात्—सप्त रसा इति, तच्चाप्रतिषेधादनुमन्यते कथंचिदिति ॥ २८॥

अनुमतमाह—परमतमित्यादि। अप्रतिषिद्धम् अधिगतमित्यर्थः। उदाहरणमाह—यथेत्यादि। कथञ्चिदिति केनापि प्रकारेणेत्यर्थः ॥ २८॥

प्रकरणानुपूर्व्याऽभिहितं विधानम्। यथा—सक्थिमर्माण्येकादश प्रकरणानुपूर्व्याऽभिहितानि ॥ २९॥

विधानमाह—प्रकरणेत्यादि। प्रकरणानुपूर्व्याऽभिहितमिति यथाक्रममुक्तम्। चन्द्रनन्दनेन च 'परिपाट्याऽर्थकथनं विधानम्' इति विधानलक्षणं कृतम्। उदाहरणमाह—यथा सक्थीत्यादि। मर्मणां प्रकरणानुपूर्व्या अभिधानं क्षिप्रतलहृदयेत्यादिकम् ॥ २९॥

एवं वक्ष्यतीत्यनागतावेक्षणम्। यथा—श्लोकस्थाने ब्रूयात्—चिकित्सितेषु वक्ष्यामीति ॥ ३०॥

अनागतावेक्षणमाह—एवमित्यादि। अनागतस्य भविष्यतः अवलोकनं कार्यार्थमवेक्षणमित्यर्थः। उदाहरणमाह—यथा श्लोकेत्यादि ॥३०॥

यत्पूर्वमुक्तं तदतिक्रान्तावेक्षणम्। यथा—चिकित्सितेषु ब्रूयात्—श्लोकस्थाने यदीरितमिति ॥ ३१॥

अतिक्रान्तावेक्षणमाह—यदित्यादि। अतिक्रान्तस्य अतीतस्य अवेक्षणम्। उदाहरणमाह—यथा चिकित्सितेष्वित्यादि ॥ ३१॥

उभयहेतुदर्शनं संशयः। यथा—तलहृदयाभिघातः प्राणहरः, पाणिपादच्छेदनमप्राणहरमिति ॥ ३२॥

संशयमाह—उभयेत्यादि। उभयोर्विसदृशयोरर्थयोर्हेतुः तस्य दर्शनम्। उदाहरणमाह—यथा तलेत्यादि। ननु, एतत् संशयज्ञानार्थमुदाहृतं, संशयोऽस्ति कुतः? तलहृदयाभिघातस्य तथा पाण्यादिछेदस्य प्राणहरत्वाप्राणहरत्वाभ्यां पृथग्दर्शितत्वात्। सत्यं, परं यत्र घातच्छेदयोर्द्वयोः सद्भावस्तत्र किं तलहृदयाभिघातान्मरणमुत पाणिपादच्छेदाज्जीवनमित्येवं संशयः ॥ ३२॥

तन्त्रेऽतिशयोपवर्णनं व्याख्यानम्। यथा – इह पञ्च-विंशतिकः पुरुषो व्याख्यायते, अन्येष्वायुर्वेदतन्त्रेषु भूतादि-प्रभृत्यारभ्य चिन्ता ॥ ३३ ॥

व्याख्यानमाह—तन्त्रे इत्यादि। तन्त्रे शास्त्रे। अतिशयस्य अतिरिक्तस्यार्थस्य उपवर्णनं ख्यापनं व्याख्यानम्। 'तन्त्रातिशय' इति पाठे तत्रेति निर्धारणे। उदाहरणमाह—यथा इहेत्यादि। पञ्चविंशतिकः पुरुषः इति पञ्चविंशतितम इत्यर्थः, अव्यक्तादीनामष्टानां प्रकृतिविकारैः षोडशभिः सह चतुर्विंशतित्वात्। पुरुष इति क्षेत्रज्ञः। स्वमतमभिधाय परमतमाह — अन्येष्वायुर्वेदतन्त्रेष्वित्यादि। भूतादिस्तामसोऽहङ्कारः; एतेन भूतादिमहङ्कारमारभ्यान्यायुर्वेदतन्त्रेषु चिन्ता नत्वव्यक्तमारभ्येति ॥ ३३ ॥

अन्यशास्त्रासामान्या स्वसंज्ञा। यथा —मिथुनमिति मधुसर्पिषोर्ग्रहणं; लोकप्रसिद्धमुदाहरणं वा ॥ ३४ ॥

स्वसंज्ञामाह—अन्यशास्त्रासामान्या स्वसंज्ञेत्यादि। अन्यानि शास्त्राणि आयुर्वेदादपराणि व्याकरणादीनि तेषु, असामान्या असाधारणा, तत्राननुगता स्वशास्त्रेष्वेव प्रयोजनवतीत्यर्थः। उदाहरणमाह—यथा मिथुनमित्यादि। ननु, स्वसंज्ञाप्रणयनं व्यवहारार्थं क्रियते, न चात्र मिथुनसंज्ञया यन्मधुसर्पिषोर्ग्रहणं तद्द्वारेण व्यवहारो दृश्यते? उच्यते—उदाहरणमात्रमेतद्यथाकथंचिदिति। अत एव पक्षान्तरमाह लोके प्रसिद्धमुदाहरणं वा। स्वसंज्ञया ग्राह्यमित्यर्थः। यथा चतुर्षु स्नेहेषु महास्नेहसंज्ञा। अतः परं केचिदधीयते–यथोष्णभयात् छायामनुस-तीति। ते तूदाहरणमपि तन्त्रयुक्तिष्विच्छन्ति। तन्न युक्तं, उद्देश-सूत्रे उदाहरणाख्यतन्त्रयुक्तेरनुक्तेः, संख्याधिक्यप्रसक्तेश्च, तस्म द्य-थोष्णेत्यादिकोऽपपाठ एवेति ॥ ३४ ॥

निश्चितं वचनं निर्वचनम्। यथा—आयुर्विद्यतेऽस्मि-न्ननेन वा आयुर्विन्दतीत्यायुर्वेदः ॥ ३५ ॥

निर्वचनमाह—निश्चितमित्यादि। उदाहरणमाह—यथा आयुर्विद्यतेऽस्मिन् इत्यादि ॥३५॥

दृष्टान्तव्यक्तिर्निदर्शनम्। यथा—अग्निर्वायुना सहितः कक्षे वृद्धिं गच्छति तथा वातपित्तकफदुष्टो व्रण इति ॥ ३६ ॥

निदर्शनमाह—दृष्टान्तव्यक्तिरित्यादि। दृष्टान्तेन व्यक्तिर्यस्मिन् वाक्ये तत्तथा। एतेनैतदुक्तं भवति—दृष्टान्तेनार्थः प्रसाध्यते यत्र तन्निदर्शनमिति। अत एव च निदर्शनात् हेत्वर्थो भिद्यते, हेत्वर्थस्य दृष्टान्तमात्रत्वात्। उदाहरणमाह—यथा अग्निरित्यादि। तथेति अभिवृद्धिं गच्छतीत्यर्थः ॥ ३६ ॥

इदमेव कर्तव्यमिति नियोगः। यथा—पथ्यमेव भोक्तव्यमिति ॥ ३७ ॥

नियोगमाह—इदमित्यादि। उदाहरणमाह—यथा पथ्यमित्यादि। क्वचिन्नियोगो व्यभिचरति, यथा—ज्वरितस्यारुचौ सत्यामपथ्यमपि दीयते; तदुक्तं 'ज्वरितोऽहितमश्नीयाद्यद्यस्य ह्यरुचिर्भवेत्। अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽथवा' इति। तन्त्रान्तरेऽप्युक्तं—"उत्पद्यते हि साऽवस्था देशकालबलं प्रति। तस्यां कार्यमकार्यं स्याद्वर्जितं कार्यमेव च"—इति) ॥ ३७ ॥

इदं चेदं चेति समुच्चयः। यथा—मांसवर्गो एणहरिणादयो लावतित्तिरिशारङ्गाश्च प्रधानानीति ॥ ३८ ॥

समुच्चयमाह—इदमित्यादि। उदाहरणमाह—यथा मांसेत्यादि। एणादयः प्रधानानि लावादयश्च प्रधानानीति समुच्चयश्च ॥ ३९ ॥

इदं वेदं वेति विकल्पः। यथा—रसौदनः सघृता यवागूर्वा (भवत्विति) ॥ ३९ ॥

विकल्पमाह—इदं वेत्यादि। प्रत्येकं वाशब्दोपादानमत्रोदाहरणे यत्र कृतं तदेकेनापि वाशब्देन बहुषु विकल्पनादर्शनार्थं; क्वचित् वाशब्दं विनाऽपि विकल्पो भवति, यथैकं रोगं प्रति बहुषु योगेषु वाशब्दं

विनाऽप्यन्यतमो योगो योऽन्य इति विकल्पः। उदाहरणमाह—यथा रसौदन इत्यादि ॥ ३९ ॥

यदनिर्दिष्टं बुद्ध्याऽवगम्यते तदूह्यम्। यथा--अभिहितमन्नपानविधौ चतुर्विधं चान्नमुपदिश्यते—भक्ष्यं, भोज्यं, लेह्यं, पेयमिति, एवं चतुर्विधे वक्तव्ये द्विविधमभिहितम्; इदमत्रोह्यम्--अन्नपाने विशिष्टयोर्द्वयोर्ग्रहणे कृते चतुर्णामपि ग्रहणं भवतीति; चतुर्विधश्चाहारः प्रविरलः, प्रायेण द्विविध एव; अतो द्वित्वं प्रसिद्धमिति। किञ्चान्यत्--अन्नेन भक्ष्यमवरुद्धं, घनसाधर्म्यात्, पेयेन लेह्यं, द्रवसाधर्म्यात् ॥ ४० ॥

सांप्रतमूह्याख्यां तन्त्रयुक्तिमाह—यदित्यादि। अनिर्दिष्टमिति साक्षादित्यर्थः। उदाहरणमाह—यथाऽभिहितमित्यादि। कथमत्रोह्यं भवतीति कथनायाह—भक्ष्यं भोज्यं लेह्यं पेयमिति चतुर्धा वक्तव्ये द्विविधमभिहितं चातुर्विध्यमत्रोह्यं भवतीत्यर्थः। बुद्धिगम्यमूह्यं प्राक् प्रतिपादितं तत् कीदृश्या बुद्ध्या गम्यत इत्याह—अन्नपाने इत्यादि। अन्नपानयोर्विशिष्टयोरभ्यवहार्ययोर्ग्रहणे चतुर्णामभ्यवहार्यविशेषाणां भक्ष्यभोज्यलेह्यपेयानां ग्रहणं भवतीति। चातुर्विध्यमेव किमिति नोक्तमित्याशङ्क्याह—चतुर्विध इत्यादि। प्रविरल इति प्रकर्षेण विरलः क्वचित्कथंचिद्भावात्। प्रकारान्तरेणापि चतुर्विधत्वमाह—किञ्चान्यदित्यादि। अत्र केचित्पूर्वपक्षं कुर्वन्ति वाक्यार्थस्यास्पष्टाविद्यमानस्य योजनादूह्यं न तन्त्रयुक्तिरिति, लीनस्यानिर्दिष्टस्य चार्थस्य वाक्यादेवोहनेनोभयरूपस्य योजनादूह्यं तन्त्रयुक्तेरेव ॥ ४० ॥

भवन्ति चात्र--

सामान्यदर्शनेनासां व्यवस्था संप्रदर्शिता ॥
विशेषस्तु यथायोगमुपधार्यो विपश्चिता ॥ ४१ ॥
द्वात्रिंशद्युक्तयो ह्येतास्तन्त्रसारगवेषणे ॥
मया सम्यग्विनिहिताः शब्दार्थन्यायसंयुताः ॥ ४२ ॥

योे ह्येता विधिवद्वेत्ति दीपीभूतास्तु बुद्धिमान् ॥
स पूजार्हो भिषक्श्रेष्ठ इति धन्वन्तरेर्मतम् ॥ ४३ ॥

इति सुश्रुतसंहितायामुत्तरतन्त्रे तन्त्रभूषणाध्यायेषु
तन्त्रयुक्तिर्नाम (तृतीयोऽध्यायः, आदितः)
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

एवं तन्त्रयुक्तीरभिधायोपसंहरन् प्रतिपादिततन्त्रयुक्तिविशेषप्रतिपत्त्यै श्लोकमाह—भवन्ति चात्रेत्यादि। तन्त्रयुक्तीनां विशेषो यथासंबन्धं विदुषा उपचारणीय इत्यर्थः। कार्तिकस्तु द्वात्रिंशद्युक्तय इत्यादिकं श्लोकद्वयं पठति ॥ ४१-४३ ॥

इति श्रीडल्ह(ह्ल)णविरचितायां निबन्धसंग्रहाख्यायां सुश्रुतव्याख्यायामुत्तरतन्त्रे पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

TANTRAYUKTI - AN EXPOSITION

By

Dr. K. R. Srikanta Murthy

Introduction:

The term 'Tantra' means a science or a scientific treatise and 'Yukti' means 'technique, devise, method and usage'. 'Tantrayukti,' thus refers to the methodology employed in the writing of a scientific treatise. In other words, the various literary techniques - grammatical and compositional-are known as 'Tantrayuktis' or Techniques of exposition.

Literary excellence was held in high esteem in ancient India and it was the deciding hall mark of textual worth and scholarship of the author. The authors had to observe strict rules and regulations regarding formation of words, their mode of usage, construction of sentences, arrangement of topics, lucid diction and so on. As such we find that all ancient treatises adopt many literary techniques irrespective of the subject they deal with. Such of the treatises which did not adopt these were disregarded and even rejected. In order to obtain acceptance from the elite of the day the authors prepared their text possessed of the approved literary techniques.

Necessity of Tantrayuktis:

Ancient authors adopted 'Tantrayuktis' for more reasons than one, of which the following three are considered most important.

Sankshepata or brevity of expression was one of the salient features of all ancient classics of India. Dearth of good writing

materials, lack of good scribes and many other reasons compelled them to be as brief as possible. 'Sutra' style was thus the most preferred. Every word stood for more than one meaning, some meanings quite popular with the common people while some were highly technical to be understood only by the initiated into particular science. Many implications and inferences were left off for the intelligent reader to derive for himself. Elaboration was thus avoided as far as possible.

Subhashitata or beauty of expression is another interesting feature of all ancient writings. Their aim is to provide a good reading appeal even before giving their reader a good intellectual feast. The richness of Sanskrit language in its vocabulary was a source of joy for the authors and they put heart and soul in creating excellent expression no matter which subject they described. This is abundantly seen in lyrical literature while scientific literature is also not devoid of it.

Gooddharthata or secrecy of expressions also was found necessary to guard ancient knowledge from heretics, the unworthy, uninitiated persons and foreigners. These and many other reasons compelled the authors to adopt various kinds of 'Tantrayuktis.'

The three aspects of Tantrayukti.

'Tantrayukti' has under its purview the following three aspects:

1. 'Tantraguna' or merits of a treatise.
2. 'Tantradosha' or demerits.
3. 'Tantrayuktis' proper or techniques of expression.

Tantrayukti in Ayurvedic Classics:

The three great authors of Ayurveda, viz., *Charaka*, *Sushruta* and *Vagbhata* have given due importance to this

subject in their treatises. *Charaka* has enumerated 'Tantragunas' (Vimanasthana, Chapter 8) and 'Tantra Yuktis'(Siddhisthana, Chapter 12). *Sushruta* devotes an entire chapter (Uttarasthana, Chapter 65). The commentators on these three classics have also tried to elaborate this subject with the help of explanations and examples. Of them *Arunadatta* deserves special mention. In his commentary on 'Asthangahridaya' he has exhaustively dealt with all the three aspects of the subject. Next in importance are the explanations of *Chakrapanidatta* in 'Charaka Samhita' and of *Dalhana* in 'Sushruta Samhita'.

There is an independent work 'Tantrayukti Vichara' by name, written by *Neelamegha*, an Ayurvedic scholar of Kerala belonging to the early part of the 9th Cent. A. D. This is based on 'Asthanga Hridaya' itself.

Method of Study.

It is advisable to begin the study with the first aspect, the last aspect, viz., Tantrayukti proper, however deserving greater attention.

Tantragunas

Before selecting any text for study it is necessary to examine whether it is worthy of study or not. *Charaka* strikes a note of warning in this behalf and says that there are many treatises current in the society and among them only those which possess the following virtues should be selected for study(Cha Vim 8/3).. The virtues numbering 18 enumerated by him are:

1. *Sumahadyashasvi dheera puruhasevitam.*

Constantly chosen for study by famous, efficient and courageous men.

2. *Arthabahulam:* with plentiful meaning and scope.

3. *Aptajanapoojitam:* praised by experts.

4. *Trividhashishyabudhihitam:* understandable by all the three types of students, viz., the intelligent, the moderate and the dull.

5. *Apagatapunaruktadosham:* free from repetitions.

6. *Arsham:* revealed or written by a Rishi who is revered for his expert knowledge.

7. *Supraneetasootrabhashyasangrahakramam:* having well-composed aphorisms,explanations,summaries and commentaries.

8. *Swadharam:* self-supported, not requiring the help of other texts.

9. *Anavapititasabdam:* free from bad usage of words.

10. *Akashtasabdam:* devoid of hard and difficult words.

11. *Pushkalabhidhanam:* rich in synonyms, with scope for wider application.

12. *Kramaagatartham:* having traditional background and sequence.

13. *Arthatatwavinischaya pradhanam:* devoted to attainment of true purpose and chief aim of the subject.

14. *Sangatartham:* relevant to the subject.

15. *Asankula prakaranam:* not disorderly or haphazard but with proper arrangement of topics, chapters, etc.

16. *Ashuprabodhakam:* quickly intelligible.

17. *Lakshanavat:* Rich in definitions. captions, etc.

18. *Udaharanavath:* Rich in examples, similies, illustrations, etc.

A treatise having these qualities illumines the intellect like the unclouded sun dispelling darkness.

Judged from the above criteria all the great classics of Ayurveda are 'Tantragunasampanna' (possessing the required virtues) and so, are worthy of study.

N.B: In addition to the above, *'Arunadatta'* has included 'Vyakhyana,' 'Vikalpa,' 'Ashraya' and 'Tatsheelya' also as 'Tantragunas.' These being not very important are described in the Appendix.

II Tantra Doshas

'Tantra doshas' are textual blemishes or demerits as opposed to 'tantragunas' (merits) described earlier. Usage of words, their meanings, construction of sentences, sequence of topics, arrangement of chapters, etc., if misused or absused form blemishes or bad qualities in the text which are considered undesirable and hence necessarily are to be avoided. Almost all ancient texts worthy of credence are thus found to be free from these blemishes. This rule applies to texts of Ayurveda also, which are described as free from textual blemishes (Tantradosha-vivarjitam).

Description of the various 'tantradoshas' are not to be found in the writings of *Charaka*, *Sushruta* or *Vagbhata*. *Arunadatta*, the celebrated commentator of 'Asthangahridaya' deserves the signal honour of being the only person to describe this subject in his commentary. The 'Tantra doshas' enumerated by him are:

1. *Aprasidhasabdam*: Use of words which are uncommon, unknown, unusual or obsolete.

Ex:- Udakyagamanam Asukhanam (Intercourse with a woman in her periods is harmful). In this sentence the term 'Udakya' meaning a woman at her menses is obsolete or uncommon term used in that sense. Similarly 'Aksheeva' and 'Vashira' to mean 'Samudra lavana' (salt), 'Bhadra' to mean 'vrishabha' (bull), 'Arva' to mean an Ashwa (horse) are uncommon words.

2. *Dushpraneetam*: ill composed, badly written such as book without sootras (aphorisms), Bhashyas (explanations) and prayojana (specific aims and utility).

3. *Asangatartham*: with untenable, unassociated words or sentences or 'sootras' contradicting one another.

4. *Asukharohi Padam*: with words which are hard to pronounce.

5. *Viruddham*: with words, sentences or doctrines which are inconsistant, incompatible, adverse or in opposition to one another. 'Viruddha' is of three kinds.

a. *Drishtanta Viruddha*: is adverse simile or illustration.

Eg: If a person were to say that "Atma is indestructible because he is not artificial, like pot". The pot given as an example as 'not artificial' is incorrect. It is artificial and so adverse to the other thing.

b. Sidhanta Virudha: is contrary to an accepted doctrine.

Eg: If statements are made that "Madhura, Amla, and Lavana Rasas bring about decrease of kapha and Katu, Tikta, Kashaya Rasas bring about decrease of Vata". these statements are quite the reverse of the basic doctrine of 'Rasa-Dosha' relationship.

c. Samaya Viruddha: contrary to an injunction, rule, advice, or tradition. Violation of any rule is thus 'virudha.'

Eg: Statements such as "Do not clap with stones, do not pull out grass". These are advices of ancient sages for the benefit of common man. No particular reason has been assigned by them. Still, these injunctions are not to be questioned and transgressed by others but are to be followed.

6. *Ati Vistritam*: Very elaborate; discussions at great length. Any text with detailed description of all matters will surely distract the reader and becomes redundant.

Eg: Mentioning each and every sweet substance while grouping 'Madhura' (sweet) substances.

7. *Ati Sankshiptam*: Very brief or very short description.

Eg: If one were to say that "Ayurveda is the knowledge of 'hetu' (cause of diseases) 'linga' (their symptoms) and 'oushada' (treatment) only". Clear understanding of the entire scope of Ayurveda can't be obtained by merely enumerating these three words. They require further elucidation.

8. *Aprayojanam*: without specific aim, purpose or utility.

Eg: After having described rules of health, the utility of observing them is also pointed out (*Yam Prapnoti Samacharan Ayurarogyamaiswaryam Yaso lokamscha saswathan*) (Ash. Hri. Su. 2/48) This is a 'prayojana vakya'. If it had not been said, anybody would have questioned the utility of these regimen. In this way every science, text, or topic has its own specific purpose and speaks of it clearly. If not done so, anything becomes purposeless.

9. *Bhinnakramam*: disorderly, out of sequence, variance with tradition.

Eg: We find in the Ayurvedic classics that the properties, normal and abnormal conditions and treatment of 'Tridoshas' are described in the sequence of 'Vata,' 'Pitta' and 'Kapha' only throughout and never a deviation is made. Had there been such change of sequence it would have become a vice for the text.

10. *Sandigdham*: Uncertain, ambiguous, disputed, unsettled or confused statements. Statements which are not well described on the basis of sound logical reasoning and not conclusively proved without any sort of doubt, will make treatises unworthy of study.

Eg: Discussions regarding timely and untimely death (Cha. vim. 3/35).

11. *Punaruktam*: (With repetitions). Texts in which topics or passages are repeated over and over again. They cause not only disgust to the reader but also give room to suspicion or doubt about the validity of the subject.

12. *Nishpramanam*: (Without authority or specificity) statements having many alternatives.

Eg: Method of preparation and administration of many recipes have more than one alternative (Ash. Hri. Chi. 1/45). Hence such a description becomes indefinite and so

unauthoritative, lacking exactness or specificity and may require further confirmation.

13. *Asamaptartham*: without conclusive proofs; inadequate reasoning.

14. *Anarthakam*: having bad, nonsensical worthless meaning, reverse or having implications, other than the required one.

15. *Vyahatam*: Conflcting, contradictory to one another. Earlier statements contradicting later ones and vice-versa.

Eg: Describing the utility of 'Mustadiquatha' for 'Nirooha-basti' (Ash. Hri. Kalpa 4/40) it is said to relieve 'prameha'. But in the course of enumerating contradictions for 'bastikarma,' the 'prameha' is mentioned. Hence these statements have become contradictory to one another. [1]

A treatise should be free from each one of these Doshas or blemishes described so far, if it were to deserve selection for study.

1. Many such seemingly conflcting statements are seen in Ayurvedic Classics. It is for the wise physician to adopt the procedures suitably as conditions demand and not consider the text as ill-merited.

III. TANTRAYUKTIS

These are various grammatical and compositional techniques found in ancient treatises. The authors made use of them mainly for guarding the true meanings and also for brevity and beauty of expressions. Like a strong fort offering a safe hideout for the army, these 'Tantrayuktis' conceal the real meanings within them. Only he who masters them can get the true insight of expressions. In this sense, Tantrayuktis are called 'Artha Durga's or Forts of expressions (Ash. San. Utta. 50).

IMPORTANCE OF TANTRAYUKTIS

'Tantrayukti's serve two important purposes.

1. *Vakyayojana:* Proper arrangement of words and sentences.

2. *Arthayojana:* Obtaining correct meanings of terms and statements.

The appropriate meanings of words and statements which are briefly made, which have more meanings than one, which have been used cleverly, which give ambigiuous meanings, etc., can be determined with a good knowledge of 'Tantrayukti,' and this helps to win over the opponent in a debate (Ash. Sang. Utta. 50; Su. Utta. 65/4-6).

Just as the sun to the lotus in the pond and a lamp in a dark house, so are 'Tantrayuktis' for a science. By its light the student has to proceed for the study. The person who studies the science without the help of Tantrayukti will never be able to get at the true essence of the treatise and shall surely fail in his attempt of knowing the subject (Cha Sid. 12/46-49)

He who has studied the science with a precise knowledge of Tantrayuktis, is worthy of worship. (Su. S. Uttar. 65/43)

Names and number of Tantrayuktis

The following are the Tantrayuktis are enumerated in Ayurveda Classics:

1. Adhikarana	19. Viparyaya
2. Yoga	20. Poorvapaksha
3. Hetwartha	21. Vidhana
4. Padartha	22. Anumata
5. Pradesha	23. Vyakhyana
6. Uddesha	24. Samshaya
7. Nirdesha	25. Ateetaavekhsana
8. Vakyasesha	26. Anagatavekhsana
9. Prayojana	27. Swasamjna
10. Upadesha	28. Uuhyam
11. Apadesha	29. Samuchaya
12. Atidesha	30. Nidarshana
13. Arthapatti	31. Nirvachana
14. Nirnaya	32. Sanniyoga
15. Prasanga	33. Vikalpa
16. Ekantha	34. Pratyuchara
17. Naikanta	35. Uddhara
18. Apavarga (Ja)	36. Sambhava

There is no difference in the names of Tantrayuktis in the above mentioned texts but their total numbers veries slightly.

'Charaka Samhita,' 'Asthanga sanghraha,' 'Astanga Hridaya' and *Neelameghas*', a 'Tntrayukti vichara' all agree with '36' as mentioned 'Sushruta Samhita' enumerates only 32; Prayojana, Pratyuchara, above while Uddhara and Sambhava being not mentioned.

1. ADHIKARANA (Subject matter)

The term 'Adhikarana' means theme, subject matter or substratum: Every branch of science or literature has invariably a subject matter which it attempts to elucidate. Arguments are advanced, symposia held and treatises written only for the explanation of the subject matter. No treatise is there which does not possess a 'theme' and no assembly which does not discuss a subject. Adhikarana is, thus, the subject matter on which the entire science is built, Adhikarana may be of many kinds such as:

Tantradhikarana: (Shastradhikarana)

The subject matter of a science in general. For example, 'Roga (disease)' is the main subject matter of Ayurveda. In the distant past, when the benevolent Rishis found that diseases became a hindrance to the pursuit of useful living, they assembled in the slopes of the Himalayas, deputed sage Bharadwaja to Indra in order to learn the science of Ayurveda from him and to propagate it in this world for the benefit of mankind. Hence 'Roga' is the Adhikarana of Ayurveda in general.

2. *Granthadhikarana:* or the subject matter of a particular treatise. Every science has one or more branches and accordingly many an indenendent treatise. Ayurveda has eight divisions and each one has many separate treatises. In general, the subject matter of all these treatises, is of course, 'Roga' and 'its remedy' but each one has in addition a special division of Ayurveda; as for example, the subject, matter of 'Charaka Samhitha' is minly 'Kayachikitsa,' that of 'Sushruta Samhita' is 'Shalya Chikitsa', that of 'Kashyapa Samhita (Vriddha Jeevakeeva Tantra)' is 'Balarogachikitsa' and so on. The particular subject matter of any treatise is thus called 'Granthadhikarana.'

A treatise may have many 'sthanas' or sections dealing with different topics, eg:- Sutrastana, Vimanasthana, etc. The

subject matter of each section is called 'Sthanadhikarana' (Arunadatta).

3. *Adhyayadhikarana:* or the subject matter of a chapter. Treatises are divided into many chapters and in each chapter one topic or a theme forms the basis of description. Usually the chapters are named on the subject matter discussed therein. For example, the first chapter of 'Sushruta Samhita' is named 'Vedotpatti Adhyaya' and in it, is described how Ayurveda originated. Similarly the first chapter of 'Vimanasthana' in 'Charaka Samhita' deals with details of 'Rasas'(Tastes)and hence called Rasa Vimana Adhyaya and so on. In this way each chapter in any treatise will be having an Adhyayadhikarana - a special theme it describes.

4. *Prakaranaadhikarana:* Subject matter of a particular context or an occasion.

5. *Vakyaadhikarana:* Subject matter of a particular sentence.

2. YOGA (Arrangement)

The term 'Yoga' means 'putting together' 'combining', 'arranging' or 'orderly collection'.

Yoga as a 'Tantrayukti' refers to 'arrangement of sentences by putting the different words and clauses in proper order so as to obtain the correct meaning.

In all ancient classics, the literary style is as important as the subject matter itself. The authors adopted different styles in their treatises to propound their subject. By this it should not be meant that each one adopted his own style irrespective of accepted grammatical rules. Adherence to grammatical discipline was there essentially. Even with it, the authors found ample scope to show their talent in the art of expression and exposition. This is specially the case in all Sanskrit treatises, those dealing with pure literature abounding in many such styles and others on scientific subjects a little less. So it

becomes necessary for the reader to rearrange the words of a sentence - either of prose or verse to get the proper meaning, without which there is the risk of misunderstanding or misinterpretation. Yoga or proper arrangement should be attempted as far as possible in all sentences or verses where it is found necessary and only then the true import of it becomes evident.

Both 'Arunadatta' and 'Chakrapanidatta' extended the use of 'Yoga' to mean 'proper arrangement' of the five limbs of a proposition, viz., Pratijna, Hetu, Udaharana, Upanaya and Nigamana.

3. HETWARTHA

(Extension of Argument)

'Hetu' denotes 'cause' and Artha is purpose. Hetwartha, together means 'purpose of the cause' 'effect of cause' and 'the application of its knowledge.'.

'Hetwartha' as a 'Tantrayukti' refers to application of knowledge of one henomenon phappening elsewhere. For example while giving the cause of 'Vatavridhi,' Acharya has said 'use of foods and habits similar in nature (Samanya) tends to increase 'Dhatu' (vata) (Cha. Su. 12/5). The use of the word 'Dhatu' here even though made with particular reference to 'Vata'. is not to be taken as exclusive for 'Vata' only but holds good evenin other places such as 'Dhatu vridhi,' etc.

Similarly the example of 'Sushruta' "just as a ball of mud becomes watery with the addition of more water, so also a wound becomes waterlogged and pours out fluid by the use of blackgram and ghee". The physical change happening outside the body is extended to explain the change taking place inside the body.

Thus, the extension of a principle enunciated at one place to many other places as well, is called 'Hetwartha'.

4. PADARTHA (import of word)

'Pada' means a word and 'Artha' is its meaning. 'Padartha' simply means the meaning of a word or a group of words.

Every word has a meaning and some have more meanings than one. The meaning of words differ in their usage in different contexts. The root of some of the words, give rise to more than one word each with a different meaning. Sanskrit is one such language in which 'roots are rich both in number and connotation. Hence it becomes necessary for a student of Sanskrit texts to become conversant with as many meanings of the term as possible used in such texts.

It may not be difficult to know the meaning of the words in some sentences, for example 'Ayusho Vedah Ayurvedah' Ayus means life, Veda means 'knowledge'. Ayurveda is knowledge of life. In some other sentences where words denote more than one meaning, doubt naturally arises as to which meaning is to be taken in that place. In such circumstances, the apt meaning of a word or words would be that which is appropriate to that particular context.

For example, the title of the first chapter of Sushruta Samhita is given as 'Vedotpatti Adhyaya'. The word 'Veda' stands for each of the four 'Vedas' and some'Upavedas' as well.So a doubt arises here as to which particular Veda this chapter refers to From a perusal of the contents of the treatise, it becomes clear that it deals with Ayurveda. So the meaning of the word 'Veda' in the title should be taken to mean 'Ayurveda' and not any other.

Similarly there are numerous words having more than one meaning used in Ayurvedic Classics which pertain to names of drugs, therapeutic methods, constituents of the boby, etc. It is te obtain the appropriate meaning of such words with reference to their context by the third Tantrayukti-Padartha.

5. PRADESHA

(Partial adumberation, direction, brief statement)

The meanings of the term 'Pradesha' are 'place' spot, in general direction, and indication. It also means 'appeal to a prece-dent, as previously as brief statement made earlier'.

'Pradesha' as a Tantrayukti has been used in both these meanings; Chakrapanidatta and Neelamegha take it to mean 'direction or indication to some other place, while Sushruta takes it to mean 'as precedent' or 'as before'.

In the sense of 'direction', or indication pradesha stands for 'contexts' (Place wherein a topic is briefly mentioned but not fully elaborated there, for risk of going out of context in view of vast detail) and referred to other places in the text for details.

For example: Charaka's statement regarding impossibility to enumerate all varieties of food, and pointing to the student to include others as and when found necessary (Cha. Su. 27/329-330)– in the sense of 'as precedent' or 'as before'. Sushruta gives an example as just as this person removed the foreign body from Devadatta (at an earlier date) he will be able to remove the foreign body from Yajnadatta also (now). Neelamegha defines 'Pradesha' as 'elaborating a brief statement made at a particular place with details from other places'.

6. UDDESHA (Concise statement)

The term 'Uddesha' means 'enunciation', 'brief statement', 'main idea in short.'

'Uddesha' as a tantrayukti are 'such terms of statements briefly enunciating a theme or an object (which may include many things under a category). For example, the term 'Shalya' does not merely stand for any one particular foreign body but includes all things that hurt the body; described later as many kinds and types'. Similarly by enumerating three words 'Hetu, Linga and Oushada Jnana (Cha. Su. 1/24) the entire scienceof Ayurveda is described'—for there is nothing more in Ayurveda than the knowledge of Hetu (cause of diseases), Linga (signs and symptoms of diseases), and oushadha (Medicaments). Similarly in the statement 'Do not suppress the Vegas (Ash·hm. su.4) the term 'Vega' is not fully described but indicated generally in short. Thus many words are found in the treatises used in a collective sense for the sake of brevity. While describing their meanings care should be taken to include all things they stand for.

7. NIRDESHA (Amplification)

Nirdesha is 'elaboration', 'giving details of'.

Nirdesha as a Tantrayukti are such statements which elaborate a theme briefly said (in uddesha)with a detail of description. For example, in the first chapter of Charaka Samhita, Sutrastana Sloka 24 Ayurveda is described as having three aspects, viz., Hetu (causes of diseases) Linga (symptomatology of diseases) and Oushadha (therapeutics). This sloka is an 'Uddesha Vakya' (Brief statement) and the entire book, then on, is the description of these three aspects only. Thus all the remaining chapters, serve as 'Nirdesha vakyas (detailed description) of these three terms.

Similarly, in the example of Sushruta after defining 'Shalya' the author goes on to elaborate on it, giving out its kinds, nature, etc. (Chapter 26 of Sutrasthana).

'Nirdesha vakya's or descriptions, follow one after the other in a sequential order and not haphazard. The sequence may

refer to any aspect such as their nature, region, time, etc. A cogent description of a proposition or a topic is considered as one of the good qualities of a text.

8. VAKYASESHA (Supply of Elipses)

'Vakyasesha' 'words needed to complete a sentence' means terms remaining over and which have to be supplied.

'Vakvasesha' as a 'Tantrayukti' refers to such statements wherein some word or words are found missing, which has to be supplemented appropriately to obtain the correct meaning of a sentence in that context.

For example:- In the statement 'pravritti the cause of creation' (Cha. Su. 16/28) the verb 'is' (Asti) has been omitted and it is to be supplied. Similarly in the words 'Janagala Rasa' the term 'Mamsa' is missing in between them. Likewise in the enumeration of organs like Shiras, Pani, Pada, etc., the term 'Purushasya' (of man) is to be supplemented.

9. PRAYOJANA (Purpose)

'Prayojana' means 'purpose', 'main idea', 'utility', 'best advantage'.

Prayojana as a Tantravukti refers to such statements which mention the main idea, chief purpose of a particular science, treatise, method or a proposition.

For example:- The Prayojana of Ayurveda is restoration of Dhatusamya (Cha. Su. 1/53).

Neelamegha defines prayojana as 'usage of a word or sentence to the best advantage to obtain more than one meaning.

For example:- In the sloka:

